कालिदासचरितम्

श्री. भि. वेलणकर

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

" ... संगीतसौभद्रम् हा श्री. वेलणकरांच्या आजवरच्या संस्कृत साहित्यसेवेचा उच्च बिन्दु मानावा लागेल. अण्णासाहेब किर्लोस्करांच्या प्रासादिक, संस्कृतप्रचुर व रसाळ साहित्याचें संस्कृतमध्ये भाषान्तर करताना श्री. वेलणकरांनी कोठेही जरा सुद्धां क्लिष्टता येऊ दिलेली नाही. किर्लोस्करांच्या सौभद्रामधील संवादांतील सारी सरलता व मधुरता त्यांनी इतक्या सहजतेने संस्कृत रूपान्तरांत व्यक्त केली आहे, कीं सबंध नाटक वाचत असतांना मनाला कोठेही जरासुद्धा खटकत नाही....संस्कृत रूपान्तरांतील पदांचा स्वतंत्र उल्लेख करावा लागेल. ... "

नवशक्ति—ता. ११-७-१९६१,
(अग्रलेख).

" ... आज एका मराठी नाटकाचें संस्कृत भाषान्तर संस्कृत रंगभूमि समृद्ध करीत आहे, हें दृश्य मराठीच्या आणि संस्कृतच्या अभिमान्यांना सारखेंच आनन्ददायक आहे. ... श्री. वेलणकरांनी केलेलें गद्य संवादांचें भाषान्तर मुळाबरहुकूम असून, तें प्रायः शुद्ध व सफाईदार आहे. "

साहित्यपत्रिका
अंक १३६, जानेवारी-फेब्रुवारी-मार्च १९६१.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासचरितम्

श्री. भि. वेलणकर

गीर्वाणसुधा प्रकाशनम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

© सौ. सुधा वेलणकर, बी. ए.
इंदिरा निवास
मुंबई ४

•

चेष्टनं श्री. बाळ ठाकूर

•

मूल्यं ३ रु.

मुद्रकाः
लक्ष्मीबाई नारायण चौधरी
निर्णयसागर प्रेस,
२६–२८ कोलभाट स्ट्रीट,
मुंबई २

प्रसिद्धिः १४ नोव्हेंबर १९६१

प्रकाशकाः
ग. का. रायकर
गीर्वाणसुधाप्रकाशनम्
झाववा वाडी, मुंबई २

एक एव विक्रेता–जयहिंद प्रकाशन मुंबई २

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आसीद् ययोर्मयि स्नेहः पुत्रकल्पो हि जीवतोः ।
तयोः श्वशुरयोः स्मृत्यै कृतिरेषा समर्प्यते ॥

श्रीरामः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

All rights of the performance of कालिदासचरितम्
or of publishing extracts .therefrom
are reserved with Mrs. Sudha Velankar.
(Indira Niwas, A. G. Street, Bombay 4)
Prior permission in writing must be
obtained on each occasion.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रयोजनम् ।

मुम्बापुर्यां १८८१ शालिवाहनशके (२०१६ विक्रमसंवत्सरे, १९६० ख्रिस्ताब्दे) मकरसंक्रमणदिनात् प्रादुरासीत्संस्कृतनाट्यमहोत्सवः । अभूतपूर्वेऽस्मिन् प्रसङ्गे नाटकाष्टकं रसिकेभ्यो नाटितं सांस्कृतिकसमित्या । तदा नवीननाटकरचना संकल्पिता । गतशके संगीतसौभद्रमिति सरसमराठीनाट्यकृतेरनुवादो गीर्वाणवाण्यां रसिकेभ्यः प्रदत्तः । अद्य तु कालिदासचरितं नूतननाट्यकृतिः समर्प्यते ।

नेदमैतिहासिकं नाटकम् । महाकविकालिदासस्य वाङ्मयस्यालोडनेन तस्य जीवितविषये यन्मम मानसेन कल्पितं तन्नाट्यरूपेणात्र निधीयते । यदीदं रसिकाभिमतं तन्मे श्रमाः सफलीभूता इति मन्ये ।

मुंबई,
आश्विन कृष्ण १० श्री. भि. वेलणकर
शके १८८३.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासचरित-

भूमिकादर्शनम् ।

(प्रवेशानुक्रमेण)

सूत्रधारः

पारिपार्श्वकौ

वसुधा – मालवेश्वरमहिषी

मदनिका, निपुणिका } महिषीसख्यौ

पण्डितराजः – नवरत्नपरिषत्प्रमुखः

कञ्चुकिन्

राजा विक्रमादित्यः – मालवेश्वरः

द्वारपालः

कालिदासः – मालवेशपरराष्ट्र – उपसचिवः; कविः

अमात्यराजः – मालवेशामात्यः

सेनापतिः – (रुद्रदामन्) } मालवेशसेनापतिः

गोपालभट्टः – } उज्जयिनीनिवासिनौ
गोविन्दभट्टः – } पण्डितराजाज्ञाकरौ द्विजौ

अलका – कालिदासपत्नी

रघुनाथः – कालिदासभ्राता

सुकीर्तिः – विदर्भेशः

विष्णुपादः – विदर्भेशामात्यः

आम्रपालः – विदर्भेशप्रणिधिः

सरस्वती – नृत्यकाव्यादिकलानिपुणा विदिशाकन्या अलकासखी मदनिकासखा

ब्रह्मदत्तः – मालवेशनयाध्यक्षः

प्रथमः प्रयोगः – मुम्बापुर्याम् १६-११-१९६१ दिनाङ्के ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कथावस्तु ।

विक्रमसंवत्सराणां पञ्चमे शतके मालवेशो द्वितीयचन्द्रगुप्त उज्जयिन्यां शशास । कालिदासनामा तस्य परराष्ट्रकार्यालये नियुक्त उपसचिवः कविरप्यासीत् । अतः स भूपप्रियः । पूर्वमेव 'ऋतुसंहारं' नाम काव्यं तेन लिखितमासीत् । विक्रमादित्यस्य नवरत्नपरिषदः प्रमुखः पण्डितराजोऽत एव कालिदासमत्सरग्रस्तः । स च राज्ञीवसुधायाः पितृ राजधान्या उदयपुरादानीतोऽतो राज्ञी कालिदासं न बहु मन्यते । प्रारम्भ एव वसन्तोत्सवप्रस्तावे नृपागमनविलम्बाद् विमनस्कां वसुधामुपगम्य पण्डितराजो निजावमानं निरूपयति तस्यै । तत एव राजा प्रविशति कालिदासकृतां समस्यापूर्तिं च भृशं प्रशस्य पण्डितराजात्तं कुशलतरं प्रथयति । तदैव कालिदास आगच्छति, विदर्भवार्तां विज्ञाय । यावदमात्यसेनापती नागतौ तावत्पण्डितराजकालिदासौ काव्यशक्तिविलासार्थं नृपेणादिष्टौ । तत्र कालिदासो विजयते । वसुधापि तदेव मन्त्रयते । विदर्भाधिपतिः कोसलाधिपतिना सह मालवविप्रियं रहसि मन्त्रयत इति श्रुत्वा सेनापतिर्विदर्भाभिगमं विज्ञापयति । वसुधा राजदूतप्रेषणमन्त्रं नृपादिष्टमभिनन्दति कालिदासश्च राजदूतत्वेन प्रेषितव्य इति सूचयति । एवं कालिदासस्योज्जयिनीतो निर्गमनं वसुधया व्यवस्थाप्यते ततश्च न स पुनरुज्जयिनीं प्रत्यागच्छेदित्यत्र तस्या यत्नः प्रसरति । कालिदास इदं दूतकार्यं प्रीत्या स्वीकृत्य, नृपोद्दिष्टं विज्ञाय च गृहं गच्छति ।

पण्डितराजो निजहस्तकेन कालिदासानुपस्थितौ तस्य ग्रन्थधनापहारं योजयति वसुधाज्ञया तु स हस्तको विदर्भान् प्रेष्यते ।

कालिदासो गृहं गत्वा निजपत्नीमलकामामन्त्र्य निजभ्रातरं रघुनाथं सहचरत्वेन गृहीत्वा च विदर्भान् गच्छति । अत्र समाप्यते प्रथमोऽङ्कः ।

विदर्भेशः सुकीर्तिः कालिदासागमनेन मालवेशभीत्या बलवदस्वस्थः । न पुनः कालिदासात् किंचिदधिकं ज्ञातुं समर्थः । कोसलेश्वरमन्त्रितरहस्यं च कालिदासो जानातीति श्रुत्वा, न सन्देशः कालिदासेन मालवेश्वराय प्रेष्य इति कृत्वा कालिदासं स बन्धने निक्षिपति । सरस्वतीं च कालिदासहृद्गतविज्ञाने प्रयुङ्क्ते ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदिशाकन्याऽलकासखी सरस्वती। अलकासार्धं कृतालापैः सा रघुनाथे स्निह्यति। विदर्भेषु च कालिदाससहचरेण रघुनाथेन सा मुच्यते गोपालगोविन्दाभिगमात्। कालिदासं वन्धागारे दृष्ट्वा तेनाकृष्टा विदर्भेश्वरलब्धमुद्रादानात् कालिदासं वन्धावासात्सा मोचयति। तस्य स्थाने स्थितेन रघुनाथेन सह गान्धर्वविधिना व्यूढा भवति। समाप्यतेऽत्र द्वितीयोऽङ्कः।

कालिदासवृत्तान्तमलभमानो विक्रमादित्यः कालिदासवन्धनं श्रुत्वा सेनया सह विदर्भानभियाति। तदा पण्डितराजो गोविन्दभट्टेन कालिदासग्रन्थचौर्यं योजयति। तदैव प्रत्यावृत्तेन कालिदासेन गोविन्दो निष्कास्यते। अलकया तस्य पुनर्मीलनं भवति। समाप्तोऽत्र तृतीयोऽङ्कः।

चतुर्थेऽङ्के कुन्तलेश्वरदौत्याय गते कालिदासे विदर्भगुप्तप्रणिधित्वारोपः क्रियते तस्मिन् पण्डितराजेन। स च नृपेण स्वयं निरस्यते। सरस्वतीविवाहश्च प्रकटीक्रियते।

पञ्चमेऽङ्के रघुवंशवर्जं ज्ञातकालिदासवाङ्मयसेवागौरवाय नृपतिः संमानं प्रयुनक्ति। सर्वेषां चिरंजीवने प्रभवन् कविः श्रेष्ठ इत्युक्त्वा सेनापत्याशङ्कां समाधाय संमानः क्रियते। नवरत्नपरिषत्प्रमुखत्वे कालिदासः स्थाप्यते पण्डितराजश्च कालिदासाकारणद्रोहस्य फलं लभते। सेनापत्याशङ्कया व्यथितचित्तः कालिदासः काव्यरचनाज्ञां लभमानो नाहमाज्ञाकरः कविरिति नवरत्नपरिषत्प्रमुखत्वस्य संन्यासपत्रं नृपाय प्रहिणोति। तदैव कालिदासस्य शान्तिदूतकार्यमसहमानः सेनापतिः स्वकार्यान्मुक्तिं याचते। तदनुमतावसमर्थो विक्रमादित्यो राजा कालिदासं परराष्ट्रकार्यालयस्थानस्य त्यागपत्रं समर्पयितुमाज्ञापयति। शान्तिदूतकार्ये न कार्यालये नियुक्तिरावश्यकीति नृपाभिप्रायं ज्ञात्वा कालिदासस्तत्त्यागपत्रममात्यराजहस्ते निदधाति। सर्वबन्धमुक्तः कालिदासः काव्यचिरंजीवनं प्राकृतजनाधीनमिति ज्ञात्वा, नृपाणां वर्तनमसहमानो नृपोत्तमानां च जीवनं वर्णयितुकामो रघुवंशमारभते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Before Entering Ujjayinee :

गौरवोद्गारहाराय गुरुगर्वप्रहारिणे ।
गीर्वाणवाग्विहाराय हरये गुरवे नमः ॥

कालिदासचरितम् is not a historical piece but a character play. Very meagre information which can be called reliable is available about this greatest poet of India. I have accepted that कालिदास lived at the court of चन्द्रगुप्त II (विक्रमादित्य) at ujjain in the 4th Century A. D. I have also accepted that he was deputed as an envoy (राजदूत) to Vidarbha (but not to वाकाटकs) by the King of Malwa. I have, however, presumed that a person who is being entrusted with such an important political mission, cannot have been a poet only. According to my concept, poetry was his passion but not his vocation. He has come down to our generation only as a poet because literature alone can remain immortal and other mudane matters are forgotten and lost. कालिदास himself has not left much information about his personal details and hence we know him only as a great poet from his surviving compositions.

His life as an advancing poet is the undercurrent of the play. The play begins when ऋतुसंहारम् has been composed and ends when he begins his great poem रघुवंशम्. The play also links up his विदर्भदौत्यम् with the genesis of मेघदूतम् and of his first play मालविकाग्निमित्रम्. His कुन्तलेश्वरदौत्यम् supposed to be lost, has also been referred to. He proceeds during the play from a beginner to the ambition of writing a popular महाकाव्यम् while living his worldly life.

Except कालिदास and the king विक्रमादित्य, all other characters are imaginary. पण्डितराज, the chief of the poets at Vikramaditya's court should not be confused with पण्डितराज जगन्नाथ of the seventeenth century. Kalidasa himself is presented here as a दूत whose

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

thoughts travel to अलका, his wife; this incident becomes the genesis of a मेघ travelling to अलकापुरी as a दूत later.

*

Some verses by कालिदास (two from ऋतुसंहारम्, one from मेघदूतम् one from विक्रमोर्वशीयम् and one from रघुवंशम्) have been used. Some have a touch of कालिदास's phraseology for obvious reasons. Three verses from सुभाषितरत्नभाण्डागारम् have been used. All other metrical compositions (145 in number) are original. For verses, traditional metres such as अनुष्टुभ्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति, द्रुतविलम्बित, पृथ्वी, भुजङ्गप्रयात, मन्दाक्रान्ता, मालिनी, रथोद्धता, विध्यङ्गमाला, वैतालीय, वसन्ततिलका, वंशस्थ, शालिनी, शार्दूलविक्रीडित, शिखरिणी, स्वागता, हरिणी etc. are used. Prākrit metres such as दिण्डी and साकी which are ताल metres have also been employed.

Songs in Hindustani style have been interspersed. Different modes (राग) such as कर्नाटकी, काफी, कामोद, खमाज, खंबावती, जयजयवन्ती, जोगी, तिलककामोद, तिलंग, दुर्गा, देस, बागेश्री, बिहाग, भीमपलासी, भूप, भैरवी, मांड, मालकंस, यमनकल्याण, रागेश्री, सारंग, सोहनी, शंकरा etc. have been used.

The styles (चाल) of singing are in some cases, the time-honoured ones; while some new ones have also been composed by me.

Purely Marathi metre ओवी is sung only by the ladies as is usual. The mode of singing by गोपालभट्ट is also a special feature of Marathi music.

*

After the नान्दी each Act has three scenes and the arrangement is suited to the producers' needs. The fifth Act has a प्रवेशक in addition. Contemporary politics as imagined has been added for atmosphere. But the undercurrent of Indian thought of अहिंसा and consequent dislike for war, is kept manifest.

A few comments have been added in the footnotes in addition to the acknowledgments of the sources. Attention has been paid to make the expression more simple than idiomatic.

The first Act takes places in उज्जयिनी in the month of चैत्र (April). The second takes place in विदर्भ, in the month of आषाढ (July) of the same year. The third Act takes place again in उज्जयिनी in the month of आश्विन (October) of the same year. The fourth and the fifth Acts take place in उज्जयिनी after an interval of 2 years and

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

4 years, respectively, from the incidents of the first three Acts. All the incidents in the same Act happen during the same period of twenty four hours.

*

I have heard two comments on my previous composition संगीतसौभद्रम्. Since the causes of those comments are repeated in this book also, a word about them would not be amiss. The first one referred to the absence of the use of Prākrit dialects by some characters in the play. When one writes in a current language, its variations according to the use by different types of persons as found in society, have to be used for creating realism. Once an unrealistic medium like the Sanskrit language is used to-day, attempts at using other prakrits lose all significance except as an immitation of ancient poets who wrote under different circumstances. Popularising Sanskrit for a specific purpose is not directly concerned with Prakrits.

The second comment referred to my prefaces in English. Even though I write a book in Sanskrit, there is a need for an introduction in English or some other language considered more accessible. A number of my friends and admirers have not only been happy about it but have demanded the same practice in future. Apart from their requests, I am convinced of the utility of such an arrangement and the same is being followed here. I have, however. added a short *raison dètré* in Sanskrit. I am thankful to all the critics who reviewed संगीतसौभद्रम् favourably and request them to bestow the same kind and critical attention on this book.

*

My manuscript was read by my Guru Prof. H. D. Velankar, by M. M. Dr. P. V. Kane, by Prof. Dr. G. V. Devasthali, Solicitor Shri S. A. Sabnis and Shri K. C. M. Bhatavadekar. All liked it and encouraged me to go ahead, adding their own suggestions. Dr. Devasthali, as usual, methodically went through it producing his copious suggestions in an amazingly short time. His suggestions were meant for the accuracy and elegance of the expression. Shri Bhatavadekar's suggestions were from the view point of the dramatic element and the clarity of expression. Scenes have been amplified in some cases at his suggestion. I have taken into consideration all of these remarks while finally sending the manuscript to

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

the Press. They may, of course, find that justice has not been done to each one of their suggestions but they will, no doubt, understand the situation. I was also lucky to be encouraged by some veterans of Marathi literature, such as Prof. Anant Kanekar, Prof. V. H. Kulkarni and Shri V. R. Dhavale. I am deeply indebted to all these well-wishers.

This time, my wife has watched the composition with an increasing concern. She somehow caught the idea that I must be really on my way to becoming a celebrated author and like अलका of कालिदास in the play, she must ensure that I proceed on my predestined path. She also seems to be sure of the success of this book and the play. The laughter scenes have been put in at her express demand. Music has also been vetted at her hands.

The immediate cause of the sudden appearance of this play is the producer, Shri Joshi. I have to thank him and his troupe of willing workers for the successful production of the play.

Inspite of the short margin of time due to a sudden decision to produce the play by कालिदास festival, and in spite of the rush of Diwali work, the Nirnayasagar Press undertook the printing and has spared no pains in delivering the goods. Shri Joglekar was particularly helpful. Shri Dharmaji was accommodating. Shastrijis treated the work almost as their own. We thank all personnel of the Press for their full co-operation.

*

गीर्वाणसुधाप्रकाशनम् has published this second book in less than Twelve months. Thanks are due to an increasing number of friends and admirers of this venture.

Lastly,

काव्यान्तर्गतकालिदासमननान्मन्मानसोत्प्रेक्षितं
स्तोकं जीवनचित्रमत्र लिखितं तद्वन्दनाहेतुना ।
स्यादेतत् किल कालिदासचरितं तोषाय तेषामिति
श्रीरामः कुरुते गुणज्ञविदुषां पादेषु विज्ञापनाम् ॥

Bombay,
6-11-1961.

S. B. Velankar

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पण्डितराज :
(श्री. गजानन खाडिलकर)

वसुधा
(सौ. मंगला पर्वते)

[१९-११-१९६१]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासचरितम् ।

– १ –

प्रथमोऽङ्कः ।

नान्दी ।

ईशः कैलासनाथो युगपदवति यो जीवनं पञ्चरूपं
गाङ्गं मूर्धोत्थमम्भो हिमघनपटलं बाष्पमेघांस्तथाधः ।
विश्वं दग्धुं समर्थं हुतवहमथ तं शीतलं चन्द्रिकेशं
यन्ता पञ्चाननोऽयं जयतु शिवकरः पञ्चबाणस्य जेता ॥ १ ॥

सूत्रधारः – (पारिपार्श्वकद्वयेन सह प्रविश्य)

(केदारः, त्रितालः)

अवतु सर्वदा शङ्करमहिमा ।
विलसति भुवने यदीयसुषमा ॥ धृ० ॥
हलाहलं यो मुदा पीतवान् ।
फणिनमपि तथा कण्ठे कृतवान् ।
संहरणं यदि जगतो वृतवान् ।
तथापि विलसति दयामधुरिमा ॥ २ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(तिलंगः, त्रितालः)

कविकुलगुरुचरितं विरचितम् ।

कालिदासयश इह कविवृन्दे रसिकानां प्रथितम् ॥
नच कविगणने श्रुतस्तत्समः सर्वेषां विदितम् ॥
महाकवित्वं कथं गतोऽसौ तच्छृणुतावहितम् ॥
रसिकसज्जनान् श्रीरामकविः प्रार्थयते प्रणतम् ॥ ३ ॥

(नेपथ्ये)

भो भो अवन्तिनिवासिनः, आज्ञापितं चन्द्रकुलावतंसेनावन्तीश्वरेण महाराजेन विक्रमादित्येन । 'अद्यप्रभृति सप्ताहावधिर्वसन्तोत्सवः प्रवर्त्यताम् । प्रासादोपवने च वसन्तोत्सवो महान् प्रस्तूयते' इति ।

[दुन्दुभिनादः ।]

सूत्रधारः—(एकं प्रति) मारिष, किमेतत् ।

पारिपार्श्वकः—भाव, राज्ये महान् वसन्तोत्सवः प्रस्तूयतेऽवन्तीश्वरेण ।

सूत्रधारः—गच्छामस्तर्हि वसन्तोत्सवे नाटकप्रयोगेणोज्जयिनीजनमनुरञ्जयितुम् । यतः—

(साकी)

भरतभूषणा उत्सवोत्सुका वयं हि नाट्ये निरताः ।
वसन्तसमये सन्तः समितास्तानुपयामो विनताः ॥
गुञ्जन्तो भ्रमराः । कमलं मधुसंचयचतुराः ॥ ४ ॥

पारिपार्श्वकः—भाव, पश्येदं शोभायुतं प्रासादोपवनम् ।

सूत्रधारः—तत्र महादेवी वसुधा मदनिकानिपुणिकाभ्यां निजपरिजनेनानुयाता वसन्तोत्सवप्रस्तावनिमग्ना । तदेहि ।

[निष्क्रान्ताः ।]

[ततः प्रविशति महाराज्ञी वसुधा विमनस्कतया प्रासादोपवन इतस्ततः संचरन्ती परिजनेनोपचर्यमाणा । वसन्तोत्सवसज्जता दृष्टिगोचरा ।]

वसुधा—मदनिके, किं नु खलु चिरयति महाराजः ।

मदनिका—मन्ये न राज्यकार्यं समाप्तं स्यात् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसुधा – कियान् किल कालो राज्यकार्यस्य समापितस्य । ततश्च पण्डितसभां प्रविष्टो महाराजः ।

निपुणिका – ननु देव्यपि तत्रासीत् ।

वसुधा – पण्डितसभायां विद्वत्कथाः काव्यशास्त्रविनोदाश्च प्रस्तुताः । अहं च वसन्तोत्सव-पूजार्थमिहागता ।

मदनिका – तदा महाराजेन किमादिष्टम् ।

वसुधा – अनुपदमेवाहमागच्छामीति ।

निपुणिका – अन्तरायविशेषेण केनचिन् निरुद्धो महाराजो नूनं चिरायते ।

वसुधा – न कोऽप्यन्तरायः संभवति ।

मदनिका – ननु गच्छानि भूतार्थनिर्धारणार्थम् ।

वसुधा – किमनेन । सुप्तो हि बोधनक्षमः । प्रबुद्धं तु को नाम बोधयिष्यति । यदाप्रभृति कालिदासः पण्डितसभायां प्रवेशितस्तदाप्रभृति तेन सह काव्यविनोदे संवृत्ते कालातिपातमपि न जानाति महाराजः ।

मदनिका – रसिकानां गुणिविदुषां महानाश्रयवृक्षो महाराजः । कालिदासश्च प्रत्युत्पन्नमति-र्नीतिशास्त्रनिपुणश्च ।

वसुधा – (रोषेण) न तथापि सह्यमिदं यत्कालिदासेन सह कथाः कुर्वन् मामिहस्थामुपेक्षते ।

(शंकरा, त्रितालः)

स्मरति नो कथं बत माम् ।
हृदयविनिहितां हितां प्रियतमाम् ॥ ध्रु० ॥
स्यादपि मधुरा तदीयकविता
कथं भवेत्सा प्रियासंमिता
दासी देव्या न भवेत् तुलिता
केह सहेत दशां विषमाम् ॥ ५ ॥

सर्वोऽपि जनो यथोचितमेव संभावनीयः । अयं परराष्ट्रकार्यालय उपसचिवत्वेन नियुक्तः कालिदासः कथं पण्डितसभां प्रविष्टः । न हि चतुःशालस्थिता संमार्जनी देवगृहे स्थापनीया ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निपुणिका—नवतामाश्रितं रमणीयत्वं देवि । कालेन महाराजस्तत्र विगतस्पृहो भविष्यति । उदेष्यति च कोऽपि नवकविः । अस्तमेष्यति चासौ कालिदासः ।

वसुधा—न हि त्वेवं निपुणिके । त्वमेव कथय । अस्मिन् रमणीये वसन्तसमयोदये कथं महाराजो नोपवनं सत्वरमायाति ।

निपुणिका—सत्यमाह देवी । मन्दसुगन्धिपवनेन विधूतं वल्लरीदलभारं वीक्ष्य, अभिनवकुसुमोद्गतिं च प्रत्यक्षीकृत्य प्रसीदति चेतः ।

मत्तद्विरेफपरिचुम्बितचारुपुष्पा[1]
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ ६ ॥

वसुधा—(प्रसन्नमनसा) रुचिरं वसन्तवर्णनम् ।

मदनिका—देवि, शृणोतु भवतीदमप्यपरम् ।

वापीजलानां[2] मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमानतानां
ददाति सौभाग्यमयं वसन्तः ॥ ७ ॥

वसुधा—केन चतुरेण वर्णितोऽयं मदनसख एवंविधः ।

मदनिका—तेन कालिदासेन ।

वसुधा—(कोपाविष्टा) कथं पुनरपि प्रतिपदं कालिदासः ।

पण्डितराजः—(सहसा प्रविश्य) तदेव भागधेयं नः सांप्रतम् । देवि, स्वीक्रियतां दीनस्यास्याश्रितस्यापश्चिमा प्रणतिः ।

वसुधा—किं वृत्तं पण्डितराज । कस्मात् त्वं दीनः । कुतश्चान्तिमः प्रणामः ।

पण्डितराजः—शृणोतु भवती । देवीचरणाश्रयेणायं देहवृक्षः संरूढश्चिरकालम् ।

---

१ ऋतुसंहारे ६·१७

२ ऋतुसंहारे ६·३

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्वत्सभाप्रमुखत्वेन च लालितः । गौरवं च नीतः । या सेवा स्वशक्त्यनुगुणमनुष्ठिता सापि देव्याऽभिमता । एवंभूतेऽपि देवि—(भाषणेऽक्षमो नेत्रे प्रमार्ष्टि ।)

वसुधा—ततस्ततः ।

पण्डितराजः—कथं कथयेय देवि । स एवाहं विद्वत्सभायामवमानितः ।

वसुधा—केनेदं साहसं कृतम् ।

पण्डितराजः—नेतःपरमुज्जयिन्यां जीवितुं शक्नोमि । अतो भवच्चरणयोर्विज्ञाप्यामन्त्र्य च गन्तुमुत्सहे । निवसेयं क्वचिदपि गिरिकन्दरेषु । तदनुज्ञातुमर्हति मां देवी ।

वसुधा—नैवं कार्यनिर्वाहः । सन्तापं परिवर्ज्य कथय केन त्वमवमानितः । कस्माच्च ।

पण्डितराजः—देवि, भवदाज्ञयैव राज्येऽस्मिन् सेवावृत्तिं स्वीकृत्य निवसामि । अद्य तु विद्वत्सभायां महाराजेन मया समस्यापूर्तिः कारिता । पश्चाच्च कालिदासेन कृतां समस्यापूर्तिं भृशं देवः प्रशस्तवान् ।

वसुधा—एवं किल ?

पण्डितराजः—अतो जानातु देवी यन्मे संन्यासग्रहणमेव समुचितम् । वृद्धोऽहं नाभिनवयुवककविरिव महाराजसन्तोषणे समर्थः ।

वसुधा—एतावता किं संन्यासः स्वीक्रियते । उदयपुरकुलजा वयं, नोदिते रिपौ पलायनं स्वीकुर्मः । उदयपुरतो मम पितुः सभाया भवानत्रानीतः । न तत्पलायनाय । उदयपुरं यथा पराक्रमे सौन्दर्ये वा तथैव काव्येऽपि धुरि स्थितम् । तदेतमुज्जयिनीजनुषं कालिदासं पराजित्य दासं करिष्यामः । न भेतव्यं भवता । परराष्ट्रकार्यालयसेवकोऽयं कथं कविर्भवति ।

पण्डितराजः—देवि,

दत्ताभयोऽयं तव देवि दासः
कुतोऽधिगच्छेद् भयलेशमत्र ।
न मारुतः शैलवरं धुनीते
विधूतवृक्षो वसुधाभृतं तम् ॥ ८ ॥

वसुधा—केनापि निमित्तेन कालिदासोऽयमुज्जयिन्या निष्कासः ।

पण्डितराजः—महाराजशासने न परराष्ट्रकार्यालये किंचित् कार्यमेव कालिदासस्यावशिष्टं ननु ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति कञ्चुकी ।]

कञ्चुकी –

प्रफुल्लपुष्पप्रचयः प्रजामुखैः
पुरन्ध्रिमूर्धस्थलपल्लवोदयः ।
प्रशान्तविष्वक्शिशिरारिमण्डलो
वसन्तमूर्तिर्नृपतिः समागतः ॥ ९ ॥

[ततः प्रविशति राजा विक्रमादित्यः ।]

राजा – अद्य विद्वत्सभायां परमरसोत्कर्षो निष्पन्नः ।

वसुधा – कथमिव ।

राजा – देवि, स्मरति भवती कच्चिद् यत् परेद्युः शिवमन्दिरं गतावावाम् । तत्र च काचिद्विधवा तमीश्वरं प्रणमन्ती दृष्टा ।

वसुधा – स्मराम्येतत् ।

राजा – प्रसङ्गं तमधिकृत्य समस्यापूर्तये चरण एकः सभायामुपन्यस्तो मया–

'सिन्दूरबिन्दुर्विधवाललाटे' इति ।

वसुधा – ततस्ततः ।

राजा – यदा न कोऽपि विद्वान् समस्यापूरणे प्रभवति तदा पण्डितराजोऽयमस्माभिर्विज्ञापितः ।

वसुधा – ततः किं तेन पठितम् ।

राजा – ब्रूहि पण्डितराज यद् भवता पठितम् ।

पण्डितराजः – यथाज्ञापयति देवः । मया पठितम्–

रे[1] पुत्र सत्सङ्गमवाप्नुहि त्वं
असत्प्रसङ्गं त्वरया विहाय ।
धन्योऽपि निन्दां लभते कुसङ्गात्
सिन्दूरबिन्दुर्विधवाललाटे ॥ १० ॥

वसुधा – साधु पठितम् । सदुपदेशोऽयं, पण्डितराजस्य प्रत्युत्पन्नमतित्वं प्रथयति ।

---

१ सुभाषितरत्नभाण्डागारादुद्धृतोऽयं श्लोकः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—पद्यमिदं न तु काव्यम् । उपदेशः, न तु रसः ।

वसुधा—क्षणादेव समस्यापूरणे सत्वररचनाचातुर्यमेव प्रतिभानिदर्शनम् । यन्नान्ये पण्डिताः कर्तुमशक्नुवन् कृतं तत् पण्डितराजेन । उदयपुरस्थानां केवलं विलासोऽयम् ।

राजा—एकेनोज्जयिनीस्थेन त्वधःकृतोऽयं विलासः ।

वसुधा—कुत एतत् । दृष्टान्तालंकृतं पण्डितराजपद्यम् ।

राजा—कालिदासविरचितोत्प्रेक्षया पुनर्दृष्टोऽन्तोऽस्य दृष्टान्तस्य । तेन पठितम्—

महेशपादप्रणताङ्गनायाः
शिवार्पितं भालगतं मसूरम्[1] ।
विलोक्य मन्ये नु हरप्रसादात्
सिन्दूरबिन्दुर्विधवाललाटे ॥ ११ ॥

वसुधा—कालिदास एव देवस्यात्रागमने विलम्बहेतुः किल ?

राजा—नैष रोषार्हः ।

अनेन दासेन किलापराद्धं
न कालिदासेन खलु प्रियेऽत्र ।
विलम्बितः काव्यरसे निमग्नः
प्रसादये त्वां हि कृतापराधः ॥ १२ ॥

तथा हि ।

काव्याम्भोधे रसवति जले मज्जतां देहिनां यद्
वीचिक्रीडां समनुभवतां कालबन्धो न सह्यः ।
तन्न द्वेष्यौ सुकविरसिकौ, नात्र काव्यप्रमादः
संयोगोऽयं नियतिरचितः, सोऽपराधो विधातुः ॥ १३ ॥

वसुधा—तन्मे नियतिरेव मन्दभागिनी ।

राजा—अयं ते रोषो यदि कालिदासोऽत्र —

---

१ शिवप्रियो माषविशेषः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्वारपालः—(सहसा प्रविश्य) जयतु देवः । आगतो महाराज, कालिदासः । देवं च विज्ञापयति । अमात्येन महाकार्यगौरवेण प्रेषितः । सत्वरं देवदर्शनमिच्छामीति । अतः परं देवः प्रमाणम् ।

वसुधा—वसन्तोत्सवप्रस्ताव इदानीं विधेयः । नात्र कालिदासेन किंचित्कर्तव्यम् । पश्चात् तं प्रासादे द्रष्टुमर्हति भवान् ।

राजा—नैतद्युक्तम् । राज्यकार्यवशात्सोऽत्र प्रेषितोऽमात्येन ।

राज्यकार्यं यथाकालं न कुर्याद् यो महीपतिः ।
न शास्ति चिरकालं स वसुधां संभृतश्रियम् ॥ १४ ॥

तद्विसृज्यतां परिजनः । भद्रमुख, प्रवेश्यतां कालिदासः ।

[दास्यौ निर्गच्छतः । ततः प्रविशति कालिदासः ।]

कालिदासः—

मदनवदनदेवं स्निग्धदेवीसहायं
गगनविलसदिन्दुं रोहिणीसङ्गतं नु ।
कुसुमयुतवसन्ते पुष्पिते चासमन्त
उपवनगतमेतं वन्दते कालिदासः ॥ १५ ॥

[प्रणमति ।]

राजा—स्वस्ति भवते । को वृत्तान्तः कालिदास ।

कालिदासः—विदर्भेभ्यो गुप्तचरः प्रत्यागतः । तेन तापदा वार्ता निवेदिता ।

राजा—कुत्र वर्ततेऽमात्यराजः ।

कालिदासः—भवदाज्ञामपेक्षमाणः ससेनापतिः कार्यमन्दिर एव तिष्ठति ।

राजा—कः कोऽत्र भोः ।

द्वारपालः—(प्रविश्य) आज्ञापयतु देवः ।

राजा—भद्रमुख, सेनापत्यमात्यराजौ कार्यमन्दिरे तिष्ठतः । अत्रागमनाय तौ सन्देष्टव्यौ । आगतौ चात्र सत्वरं प्रवेष्टव्यौ ।

द्वारपालः—यथाज्ञापयति देवः । [निष्क्रान्तः ।]

वसुधा—वसन्तोत्सवप्रारम्भे व्यापृतो महाराजो नैवं केनाप्युपगम्यो भवितुमर्हति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—देवि, कण्टकास्तृतमेव राजसिंहासनम् ।

महापदस्थितस्यापि जनसेवा न वर्जिता ।
न क्रमः परिहार्योऽयं ज्योतिष्कुलपतेरपि ॥ १६ ॥

वसुधा—ननु मन्ये कालिदासोऽभिमतो भवतः । अतोऽमात्यराजेनोत्सवविक्षेपेऽपि स नियुज्यते ।

राजा—कथं मे पक्षपातित्वम् ।

वसुधा—अन्यथा कथमाधुनिकोऽयं कालिदासो ज्येष्ठाधिकारिणमवमन्येत ।

राजा—कोऽवमतः । कदेदं संवृत्तम् । कथं न मया ज्ञातम् ।

वसुधा—श्रूयते पण्डितसभायां पण्डितराजोऽनेनावमत इति ।

राजा—किमिदं कालिदास ।

कालिदासः—न मया ज्ञायते देव । प्रसीदतु देवी । यन्मयापराद्धं तत्क्षन्तव्यं भवत्या । न तु जाने किमिदमिति ।

वसुधा—किं वृत्तं पण्डितसभायाम् ।

राजा—तत्तु मया पूर्वमेव कथितम् ।

वसुधा—तत्र कालिदासपद्यं रसवत्तरं मत्वा किमुक्तं भवता पण्डितराजस्य ।

राजा—उक्तं पण्डितराजो वृद्धत्वं गत इति ।

वसुधा—नायं नन्ववमानः ।

राजा—यद्येवं स्यात् तथापि तन्मयोक्तम् । कोऽत्रापराधः कालिदासस्य ।

कालिदासः—न हि न हि ।

कथं दोषः स्पृशेदत्र विष्णोरंशं महीपतिम् ।
न स्पृशेद् रजनीध्वान्तं नभो धाम प्रभावताम् ॥ १७ ॥

राजा—देवि, काव्यज्ञा रसिका भवती । तत्स्वयमेवोत्तराधरयोर्निर्णयं कर्तुमर्हति । पण्डितराज, कालिदास, भवतोः काव्यशक्तिर्विलास्यताम् । आज्ञापयतु देवी ।

वसुधा—देव, संनिहिते भवति कविपुष्पमालाधारिणि, नेदं साहसं मयानुष्ठेयम् । भवानेवाज्ञापयतु । शृणोमि काव्यप्रपञ्चमुभयोः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – बाढम् । ज्येष्ठोऽयं पण्डितराजः प्रथमं पठतु । यच्च वृत्तं स प्रयुनक्ति तदेव भवता प्रयोक्तव्यं कालिदास ।

कालिदासः – अनुगृहीतोऽस्मि ।

राजा – वर्ण्यतामियं क्षिप्रासरिदुभाभ्याम् ।

पण्डितराजः – यथाज्ञापयति देवः ।

क्षिप्रा नदी जीवनमुज्जयिन्यां
शुभं नदन्ती सुतरां विभर्ति ।
भृङ्गीव सा मालवपादपद्मे
गुञ्जारवैरत्र सुखं लुठन्ती ॥ १८ ॥

वसुधा – साधु गीता क्षिप्रा भृङ्गीवोत्प्रेक्षिता । तुष्टास्मि पण्डितराज ।

कालिदासः –

क्षिप्रा नटी जीवननृत्यसक्ता
विलासिनी स्वादनयाचमाना ।
पयोधरा[1] शीतलवातदूता
विवर्तते विक्रमते[2] पुरस्तात् ॥ १९ ॥

राजा – अहो वैदग्ध्यम् ।

वसुधा – चतुरं वर्णनं, न पुना रुचिकरम् ।

राजा – अपरं किंचन पश्यामः । पण्डितराज, वर्ण्यतां यत्परं सुखं मन्यते भवता ।

पण्डितराजः – किमन्यत्सुखं गेहिनाम् ।

सानन्दं[3] सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी
सन्मित्रं सुधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः ।
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते हि सततं तेषां सुखं स्यात्परम् ॥ २० ॥

---

१ 'पयः अधरः यस्याः' इत्यपि ज्ञेयम् । २ 'विक्रम ते' इत्यपि ज्ञेयम् । ३ सुभाषितरत्नभाण्डागारादुद्धृतं पद्यमिदम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसुधा—मान्यमेव सुभाषितवचनमिदम् । किमतः परं सुखं स्यात् । सुष्ठु निरूपितम् ।

राजा—नेदं वचनं पण्डितराजप्रतिभाप्रकर्षः । तथा च लौकिकं भौतिकमीप्सितं गृहिणामिदम् । नात्र काव्यशक्तिविशेषः । निरूप्यतां कालिदास भवता यत्परं दुःखम् ।

कालिदासः—देव,

संगीतिर्मधुराऽपि या स्वरविदा चेतोहरा न श्रुता
काव्यं वा पदमर्मविद्बुधजनैः स्यादत्र नालोडितम् ।
सौन्दर्यास्पदमेव केवलमनास्वादेन वा शीर्यते
तद् दुःखं हि रसोद्गमेऽपि रसिको राजन् न संपद्यते ॥ २१ ॥

राजा—साधु । साधु । कथं मन्यते देवी ।

वसुधा—अतिशयोक्तिरियम् ।

राजा—तत एव काव्यनिर्मितिः । अपरं च पृच्छामः । पण्डितराज, कालिदास,

अंतनुज्वरपीडितासि बाले
तव सौख्याय मतो ममोपवासः ।
रसमर्पय वैद्यनाथ नाहं
भवदावेदितलङ्घने समर्था ॥ २२ ॥

केयम् ।

पण्डितराजः—देवि,

ललनास्ति महाज्वराहता
उपवासं भिषगादिशत्यतः ।
अथ सार्थयते रसौषधं
असमर्था भिषगुक्तलङ्घने ॥ २३ ॥

कालिदासः—काचित्तरुणी भिषग्व्यपदेशेनागतं प्रियं वदति ।

---

१ सुभाषितरत्नभाण्डागारादुद्धृतं पद्यमिदम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अतनोर्मदनादयं ज्वरो
न च वासो निकटे भवेदलम् ।
प्रभवामि न लंघनस्य ते
प्रिय, मे प्रीतिरसं समर्पय ॥ २४ ॥

वसुधा – कालिदासविवरणं समीचीनतरम् ।

राजा – उच्यताम् ।

कुमुदिनी शशिनैव विलोपिता ।

कथमेतत् ।

पण्डितराजः – एवं संभवेद्देव ।

परिविलोकयता विधुमुत्थितं
कुमुदिनी ह्युदहारि शशिप्रिया ।
उदितचन्द्रमसे च समर्पिता
कुमुदिनी शशिनैव विलोपिता ॥ २५ ॥

कालिदासः – श्रूयतां महाराज कथमिदमत्याहितं संभूतम् ।

स्मृतिनिमीलितलोचनयोषिता
न विदितं रमणागमनं ननु ।
सपदि तत्करपाशधृताऽऽवृता
कुमुदिनी शशिनैव विलोपिता ॥ २६ ॥

वसुधा – अहो सरसत्वं कालिदासकल्पनायाश्चातुर्यं च रचनायाः ।

राजा – कालिदास, प्रसन्ना देवी तव प्रतिभया । तदुभभ्यां सैव वर्णयितव्या ।

पण्डितराजः –

यस्या नाथेन पृथ्वी शिरसि परिधृता कीर्तिशुभ्रेव गङ्गा
जृम्भावन्तश्च कण्ठे विषमविषधरा रक्षिताः कालदासाः ।
जाया सैवोज्जयिन्यां नरपतिमहिषी श्रीमहाकालभूमौ
गौराङ्गी राजतेऽसा उदगवनिसुता देवता शम्भुगौरी ॥ २७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – साधु पण्डितराज । शम्भुरहं नु ।

वसुधा – दर्शयतु निजकौशलं कालिदासोऽधुना ।

कालिदासः –

ज्योत्स्नां या मन्दहास्यैः शरदि समुचितां दर्शयन्ती वसन्ते
सौन्दर्येन्दीवरं या विकचयति तथा भास्वरं सर्वकालम् ।
धत्ते विद्युल्लताभां जलधररहितेऽप्यत्र या देवता तां
धन्योऽयं कालदासो व्यतिकृतसमयां वन्दते कालिदासः ॥ २८ ॥

राजा – सत्यं सर्वे वयं कालदासा एव ।

वसुधा – जितं कालिदासेन । [पण्डितराजो निष्क्रान्तः ।]

द्वारपालः – (प्रविश्य) देव, समागतौ सेनापत्यमात्यराजौ ।

[निष्क्रान्तः । अमात्यराजसेनापती प्रविशतः ।]

राजा – किमिदं विदर्भवृत्तम् ।

अमात्यराजः – विदर्भेश्वरोऽस्मच्छत्रुभिः सह मन्त्रयमाणः किमपि नो विप्रियं चिकीर्षति ।

राजा – कोऽयमस्मच्छत्रुः ।

अमात्यराजः – कोसलेश्वरः ।

राजा – तत्कथं भवान् मन्यते ।

अमात्यराजः – निषेधसन्देशं प्रखरं प्रेषयामः ।

राजा – अपि ज्ञातं किं ताभ्यां मन्त्र्यते ।

अमात्यराजः – न विज्ञातमिदं देव ।

राजा – सेनापते, किं समीहते भवान् ।

सेनापतिः – महाराज, राजनीतिशास्त्रं युद्धशास्त्रं चात्र सामान्यनीतिमनुसरतः । अप्ररूढमूलः शत्रुः कुद्रुमवदुत्खातव्यः । कंचित्सेनाविभागं भवदाज्ञया विदर्भानुपनेतुमिच्छामि । युद्धसिद्धतादर्शनेनैव विदर्भेशः प्रायः शरणागतो भवेत् । अथापि युद्धं प्रसज्येत, ततः सेनाया अधिकांश इतो विदर्भानभियास्यति ।

राजा – न युद्धकारिता प्रथमत एव समर्थनीया । न जानीमो विदर्भमन्त्रितं कोसलमनीषितं वा । प्रायो न तावपि समरलालसौ । अस्माभिः श्रुता किंवदन्ती कदाचिद-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लीका स्यात् । प्रसारिता च भवेत्केनापि युद्धपिपासुना । अतो विश्वासार्हं राजपुरुषं निरीक्षणार्थं प्रेषयामः । सेना समरसज्जा साधयितव्या न पुनः प्रेष्या ।

अमात्यराजः – यथाज्ञापयति देवः ।

राजा – कथं वा मन्येते देवी ।

वसुधा – भवन्मतमेवात्र समीचीनम् । न युद्धं लोककल्याणकरम् । किंचित्तु वक्तुमिच्छामि भवदाज्ञया प्रस्तुते विषये ।

राजा – अनिर्बन्धं भाषतां भवती ।

वसुधा – कालिदास एवात्र विदर्भान् प्रेषितव्य इति मन्ये ।

राजा – कथं कालिदासः प्रेषितव्यः ।

अमात्यराजः – राजनीतिविशारदो मधुरवाक्चतुरश्च सः । (साभिप्रायं देवीं विलोक्य) योजकस्तत्र दुर्लभः ।

सेनापतिः – महाराज, नात्र पण्डितैः कार्यम् । अन्यः कोऽपि प्रयुज्यतां परराष्ट्रयुद्धभेदनीतिविशारदः ।

वसुधा – सेनापते, न खलु जानासि कालिदासप्रभावम् । परराष्ट्रकार्यनीत्यां निपुण एषः । तथा च प्रियोऽयं महाराजस्य विश्वासपदम् ।

राजा – एवमस्तु । उभौ भवन्तौ गत्वा विदर्भेश्वरं सन्देशं लेखयताम् । कालिदासस्य निर्गमनप्रवासव्यवस्था च समाधया ।

अमात्यराजः – यथाज्ञापयति देवः ।

राजा – सन्देशे चैतद्विशदीक्रियतां यन्न वयं रणोत्सुकाः किं त्ववश्यं रणसज्जा इति ।

सेनापतिः – युक्तमेतत् । अनुजानातु भवानस्मद्गमनम् ।

राजा – इदमप्यपरं विधीयताम् । यावत्कालं कोसलेश्वरविघ्नो न निरस्तस्तावन्नोत्सवः समुचितः । तद् सर्वं व्यवस्थाप्य कालिदास उज्जयिनीं यावन् न प्रत्यागच्छति तावत्सर्वो महोत्सवः प्रतिषिध्यताम् ।

वसुधा – वसन्तोत्सवस्तु सर्वजनैरिदानीं प्रारभ्यते ।

राजा – सोऽपि प्रतिषेध्यः ।

अमात्यराजः – यथाज्ञापयति देवः ।

[उभौ प्रणम्य निष्क्रान्तौ ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – अपि रोचते ते कार्यन्यास एष कालिदास ।

कालिदासः – देव, मदीयमातृभूमिकृते स्वागतमेवास्या आज्ञायाः । यतः–

मातृभूमिविजयः प्रियो हि मे
पर्वकाल उदितोऽद्य सर्वथा ।
प्रेषयेत् त्वरितमेव मां भवान्
प्रार्थये सफलजीवनोत्सुकः ॥ २९ ॥

अतो भवदाशिषा कार्यं सफलीकर्तुमुत्सहे ।

राजा – साधु कालिदास गदितम् ।

कालिदासः – देव,

पुराङ्गदवृतो दुरासद इहैष पन्थाः स्मृतः
पथा परिगतस्तथा स्वयमनेन नारायणः ।
तदेव मम हन्त देव पुनरद्य दौत्यं स्थितं
शुभा मयि तवाशु भाग्यवति सन्तु सर्वाशिषः ॥ ३० ॥

तद् भवन्तावभिवादये ।

राजा – सावधानचित्तेन सदैव स्थीयताम् । यः सेनांशस्ते रोचते स सार्धं नेयः । अस्मन्मनीषितं विदर्भेश्वराय निवेद्यम् । तेन मनसि कृतो गूढाभिसन्धिश्चावगम्यताम् । तथा च राजदूतस्य तवाचारोऽनवद्य एव भवितुमर्हति । अतः–

अस्मान् साधु विचिन्त्य गुप्तकुलजान् भूमीश्वरान मानिनः
श्रेयः कार्यमवन्तिदेशजनुषां, हार्यं रणं नाशनम् ।
श्रेष्ठं यन्ननु राजदूतवसनं नेयं न तन्निन्द्यतां
भाग्यायत्तमतःपरं न सहते केनापि तद्वाच्यताम् ॥ ३१ ॥

अपि च ।

यदि न च परिहार्यः संगरः सर्वयत्नैः
समरचतुरसेना नः सदा सिद्धशस्त्रा ।
अनुभवतु स नित्यं सौहृदं स्वेच्छया नो
न तु विभवविनाशं श्रीविदर्भावनीशः ॥ ३२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अपरं च ।

प्रजा याः पुत्रवत् प्रेम्णा पालिता लालिता मया ।
न तासां हननं द्रष्टुमुत्सहेऽहं निरागसाम् ॥ ३३ ॥

कालिदासः –

धन्याः प्रजाः समधिगत्य नृपं सखायं
तासां हिते रतमथो करुणाकरं च ।
धन्यो जनः परमयं च तदाश्रयेण
सेवाऽपि भाग्यनिहिता ननु साऽत्र धन्या ॥ ३४ ॥

महाराज, भवन्मनोगतं मत्प्राणैरपि साधयामि । साधयामि चेदानीं कार्यसिद्धयै ।

[उभौ प्रणमति ।]

राजा – शुभास्ते पन्थानः सन्तु ।

वसुधा – गम्यतां पुनर्दर्शनाय । [निष्क्रान्तः कालिदासः ।]

राजा – ननु न रोचते कालिदासो भवत्यै ।

वसुधा – यन्न मे रोचते तद् भवतः कालिदासपक्षपातित्वम् ।

राजा – न मे कालिदासे पक्षस्नेहोऽपि तु तस्य काव्यकलायाम् ।

वसुधा – पण्डितराजस्य कविता पुराभिमता नाधुना भवन्मनोहारिणी ।

राजा – न तस्य काव्येऽभिनवकल्पना रसोत्कर्षो वा ।

वसुधा – प्रकृतिरेव भवतोऽभिनवस्पृहावती । यदि च न भवान् कालिदासपक्षपाती किं ततो वसन्तोत्सवप्रतिषेधः ।

राजा – परचक्रभये कुत उत्सवः । गन्तव्यं मयाधुना विदर्भेश्वरसन्देशानुज्ञापनाय । विश्रम्यतां भवती । [निष्क्रान्तः ।]

वसुधा – अङ्किता दासीयं कालिदासकविता न महाराजस्य मनःशासनं कर्तुमर्हति । कालिदासः पुनरुज्जयिनीं प्रति यथा न निवर्तेत तथा संविधेयमधुना ।

(दुर्गा, त्रितालः)

अपसारिता कविताङ्किता ।
अहिते हि मे या प्रेरिता ॥ ध्रु० ॥
न कदाङ्गना सहते सपत्नीम् ।
अपि वाङ्मयीं प्रभुतावृता ॥ ३५ ॥ [निष्क्रान्ता ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



विक्रमादित्य :
(श्री. विठ्ठल जोग)

वसुधा
(सौ. मंगला पर्वते)

[१९-११-१९६१]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति गोपालभट्ट उज्जयिनीपथे ।]

गोपालः—शठोऽयं कालिदासः । विधवाललाटे सिन्दूरबिन्दुं निधाय नृपेण प्रदत्तं धनं स्वयमपहृतवान् । महाराजोऽप्यस्माकं न गुणवेत्ता । समस्यापूरणं कालिदासं पृच्छति । न पुनरस्मान् । विधवाललाटे कालिदासेन सिन्दूरबिन्दुनिधाने को लाभविशेषः । अयं गोपालभट्टोऽपि विद्वान् वैदिकः । विधवाललाटसमस्यां झटिति पूरयति । का च समस्यापूर्तिरपि कृता कालिदासेन । सुतरामरसिको ह्येषः । पुनः पतिलाभेन, विहितेनाविहितेन वा, विधवाललाटे सिन्दूरबिन्दुरित्यपि न कथितवान् । अथवा विविधा धवा यस्याः सेति बहुव्रीहिविग्रहेण सिन्दूरबिन्दोरुपस्थितिर्विधवाललाटे प्रवचनीया । तदपि न साधितं तेन । अहमेवाधुना समस्यां सम्यक् पूरयामि । तथा कृते धनलाभो मदनिकाप्राप्तिश्च । न सा वराकी मह्यं निर्धनाय स्पृहयति । कथं न्वियं समस्या पूरिता स्यात् । सिन्दूरबिन्दुर्विधवाललाटे । किं नामेदं वृत्तम् । ननु शार्दूलविक्रीडितं भवेत् । नहि नहि । 'भो न स्याद् विधवाललाट इह तच्छार्दूलविक्रीडितम्' । ननु भुजंगप्रयातम् । लभ्येतैव विधवाललाटे भुजंगप्रयातम् । भवतु तत् । किं मे वृत्तेन । दुर्वृत्त इत्येव प्रथितोऽहम् । कथं तु विधवाललाटे सिन्दूरबिन्दुः । अविनय एव एष विधातुर्यत् काव्यकल्पना अपि कविना निर्मातव्याः । ननु किं मत्तोऽधिकतरं कालिदासे । स नरः, अहं नरः । स ब्राह्मणोऽहमपि ब्राह्मणः । स पण्डितोऽहमपि पण्डितः । केवलं तस्य पत्नी सास्ति, मम तु नास्ति । अतस्तेन कृताः कविकल्पनाः । मम तु कुविकल्पनाः । अधुना वेदोक्तमार्गमाचरामि । 'अयं वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति । तत्र श्रवणं तु कृतमेव मया । सांप्रतं मननं निदिध्यासनं च । [उपविशति । ध्यानधारणां नाट्यति ।] सिन्दूरबिन्दुर्विधवाललाटे । विन्दुर्न सिन्धुर्विधवाकपाटे । विधवा—विधवा—

मदनिका—(प्रविश्य) अयमधिगतः ।

गोपालः—(नेत्रे उन्मील्य) इयमस्माकं विधवा । वियुक्ता धवेनेति नाम विधवा । नाद्यापि मया संयुक्ता ।

मदनिका—उत्तिष्ठ रे कापटिक । पण्डितराजस्त्वामाह्वयति ।

गोपालः—(उत्थाय) मदनिके, त्वं कदाऽऽह्वयिष्यसि ।

मदनिका—अहमेवात्र त्वन्नाम्ना कण्ठशोषं करोमि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—न हि न हि । मन्नाम त्वत्कण्ठभूषणं भवितुमर्हति । न शोषणम् । भवतु । कथमुक्तं पण्डितराज आह्वयतीति । त्वमेव ननु मामाह्वयसि ? साधु । लप्स्यसे सिन्दूरबिन्दुम् ।

मदनिका—कोऽयं सिन्दूरबिन्दुः ।

गोपालः—विधवाललाटे स्थातुकामः ।

मदनिका—किं तेन मम ।

गोपालः—मुग्धे, कथं न जानासि । अये, अयं सिन्दूरबिन्दुर्विधवाललाटे स्थापयितव्यः ।

मदनिका—ततः किं भवेत् ।

गोपालः—प्रभूतधनलाभः ।

मदनिका—कस्यैष स्यात् ।

गोपालः—मम च तव च ।

मदनिका—नाहं तु विधवा । सिन्दूरबिन्दुरप्यस्ति मे ललाटे ।

गोपालः—मैवम् । धवेन स्थापितः सिन्दूरबिन्दुरेव नित्यः । त्वं तु विधवैव । दर्शयाथवा तव धवम् ।

मदनिका—यद्येवमनर्थकरं जल्पसि तत्पण्डितराजमाक्रन्दामि ।

गोपालः—कोऽनर्थोऽत्र । अहं धवस्त्वां विधवां सधवां कर्तुमुत्सहे ।

मदनिका—नाहं तवानुरूपा । अन्यां कांचित्प्रार्थयस्व ।

गोपालः—कथमेवं वदसि । भविष्यस्यनुरूपा मत्सहवासेन ।

मदनिका—ननु कथं ते जायया भवितव्यम् ।

गोपालः—शृणु ।

कामिनी हृदयमोहिनी मदनबोधिनी नयनसंक्रान्ता ।
संहरति दर्शनं सकलमथान्यत् कान्ता ॥
दारिका चित्तहारिका शुक्रतारका कदाचित् स्पृष्टा ।
विरहेण देहदहनं वितरेद् हि विसृष्टा ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आयाति सुवक्षः पुरोगति स्नेहलं
प्रतिकर्षति चरणे निबिडनितम्बस्थलं
नासिकाधरस्य च निवारयत्यविनयं
रक्तता कपोलोद्गता हनुश्चोद्धता कामिनोन्नीता ।
दर्शयेदमरमन्दिरं मधुघटैः सिक्ता ॥ ३६ ॥

मदनिका – नैतन्मे वर्णनम् । अन्यां मार्गय । गच्छ सत्वरम् । पण्डितराजस्त्वामाह्वयति ।

गोपालः – आह्वयतु । न मया श्रुतं तदाह्वानम् । कदा तु भवती स्वयंवरमालां मत्कण्ठे निधास्यति ।

मदनिका – न भवान्मे रोचते ।

गोपालः – कथमिव । किंप्रकारकं भर्तारमपेक्षसे । कथय ।

मदनिका – शृणु ।

वैभवसंयुतः । मधुरदर्शनः ।
पत्नीच्छापूरणः । स्मितव्रतः ॥ ३७ ॥
कुलशैलशृङ्गात् । यौवनसलिलः ।
निर्झरो निर्मलः । अवतीर्णः ॥ ३८ ॥

गोपालः – एवंभूतो भर्ता न त्वया लभ्यो मदनिके ।

मदनिका – कथमिव ।

गोपालः – न सोऽद्याप्यवतीर्णः । मा त्वं तस्य जन्मपर्यन्तं विधवा तिष्ठेः । एहि ।

मदनिका – तव पद्यबन्धप्रयासा मे मस्तकशूलजनकाः ।

गोपालः – मूढे तत एव धनलाभः ।

मदनिका – मस्तकशूलात् ?

गोपालः – नहि । काव्यात् ।

मदनिका – कस्मादिदम् ।

गोपालः – यत्कालिदासेन कृतं तदेवाहं करोमि ।

मदनिका – कथय किं तत् ।

गोपालः – कथयामि यदहं करिष्यामि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनिका – न हि रे पण्डित । कथय यत्कालिदासेन कृतम् ।

गोपालः – (तारस्वरेण) – अनाचार एषः । किं ते कालिदासेन । स्वैरिणि, ताडयामि त्वाम् । [तामभिधावति ।]

मदनिका – (आक्रोशन्ती) पण्डितराज, अयं नृशंसो मां ताडयति ।

गोपालः – आह्वय तं कालिदासं ननु ।

गोविन्दः – (प्रविश्य) रे विद्याचन्द्रकलङ्क, किमेतत् संघटते । [तं निगृह्णाति ।]

गोपालः – रे गोविन्दमट्ट । त्वं विद्वान् पण्डितः । सत्यमेतत् ।

गोविन्दः – नालीकम् ।

गोपालः – ज्योतिर्वित् त्वम् । सत्यं नु ।

गोविन्दः – नासत्यम् ।

गोपालः – तत्कथं निषिद्धाचरणमिदं ते ।

गोविन्दः – कुतो मे निषिद्धाचारः ।

गोपालः – ब्रूहि मे त्वमेकमपि शास्त्राधारं येन त्वयाऽहं निगृह्यः । दर्शयैकामपि ग्रहगतिं येन त्वयाहमेवं वक्रीकर्तव्यः ।

गोविन्दः – रे पापमते । इमां मदनिकामभिधावसि किमत्र शास्त्रवचनम् ।

गोपालः – भोः । न स्त्री शास्त्रवचनाधारमर्हति ।

गोविन्दः – अपि तु किं घर्षितैषा ।

गोपालः – किं तव खण्डितं तत्र ।

गोविन्दः – भवेदपि सा मम पत्नी कालवशात् ।

गोपालः – त्वं कालवशो भविष्यसि । न तु सा ते पत्नी भविष्यति ।

गोविन्दः – कथमेतत् ।

गोपालः – सा प्रथमतो मया वृता ।

गोविन्दः – वृता ? कदा ? कथम् ?

पण्डितराजः – (प्रविश्य) किमत्र संविधानम् । गोपाल, मयाऽऽहूतोऽपि कथं त्वं नागतः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—एष गोविन्दभट्टः शास्त्रकलहं कलत्रहास्यं करोति ।

पण्डितराजः—गच्छ त्वं गोविन्द । न मध्याह्नपूजाऽद्यापि निर्वर्तितेति कुपिताऽस्मद्गेहिनी । तद्गत्वा सर्वं यथाशास्त्रं निर्वाहय । मदनिके, कुतस्त्वमत्र वर्तसे ।

मदनिका—भवन्तमेव मार्गयन्ती गोपालभट्टेन सह संवदन्ती क्षणमात्रमतिष्ठम् ।

पण्डितराजः—कुतो ममान्वेषणम् । कुतश्च गोपालेन सह ते संवादः ।

मदनिका—देवी वसुधा भवन्तमाह्वयति ।

पण्डितराजः—कुत्र वर्तते देवी ।

मदनिका—निजप्रासादगतैव ।

पण्डितराजः—तर्हि प्रतिनिवृत्य ममागमनं देव्यै निवेदय ।

मदनिका—यथाह भवान् । [निष्क्रान्तौ मदनिका गोविन्दश्च ।]

गोपालः—कृतं भवता निर्मक्षिकम् । तत्कथयतु भवान् प्रयोजनम् ।

पण्डितराजः—किमत्र संवृत्तमासीन् मदनिकया सार्धम् ।

गोपालः—प्रणयस्य प्रथमाविष्कारः ।

पण्डितराजः—ततः किं समुत्पन्नम् ।

गोपालः—सा विभववन्तं पतिं वाञ्छति । मम तु कुतो विभवः ।

पण्डितराजः—अस्ति मार्गो विभवसंपादने ।

गोपालः—क एषः । शीघ्रं कथयतु भवान् ।

पण्डितराजः—न स ते रोचेत ।

गोपालः—कथमिव ।

पण्डितराजः—साहसाश्रयोऽसौ ।

गोपालः—साहसम् । किं युद्धं कार्यम् । नैतन्मया साध्यम् । शरकृपाणादि दृष्ट्वैव कम्पो मे पादयोः संजायते ।

पण्डितराजः—विना शौर्यं न संपद् । कुतस्तु पत्नीप्राप्तिः ।

गोपालः—तथापि न मे युद्धम् । अन्यत्किमपि कथयतु भवान् ।

पण्डितराजः—एवं कुरुष्व । कदाचित् प्रसङ्गवशात् कालिदासाश्रमात् तस्य ग्रन्थधनमपहार्यम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—ततः किं भवेत् ।

पण्डितराजः—धनलाभो भार्यायोगश्च ।

गोपालः—युज्यते । प्रयतिष्येऽत्र ।

पण्डितराजः—न तु केनापीदं ज्ञेयम् । रहस्यमिव गोपनीयम् ।

गोपालः—साधु । जायालाभार्थे किं नाम लिखितं ललाटे न जाने । [निष्क्रान्तः ।]

पण्डितराजः—अस्मिन्नवसरे प्रतिपक्षविनाशाय बलवत्तरं किंचिदाचरणीयम् ।

(रागेश्री, त्रितालः)

वरं रिपुणा वृतं निर्गमनम् ।
कतिपयमासान् न सभास्थानम् ।
भवेन्मदीयं कण्टकवसनम् ॥ ध्रु० ॥
मेरुमणिरहं नवरत्नानाम् ।
यदीह विजितः कथं जीवनम् ॥ ३९ ॥

[निष्क्रान्तः ।]

[ततः प्रविशति शिवगौरीपूजानिरता कालिदासजायाऽलका स्वालयप्राङ्गण उज्जयिनीनगरे ।]

अलका—(पूजां समाप्य) देवि,

(बागेसरी, त्रितालः)

ते हि चरणे मे शरणं
सकलदुरितादवतां रमणम् ॥
स्थिरचरमाता त्रिभुवनभरणं
संसृतिसिन्धोस्त्वमेव संतरणम् ॥ ४० ॥

[नेत्रे निमील्य ध्यायति । कालिदासः प्रविशति । पूजाविधिं दृष्ट्वा विना नादं स्तब्धस्तिष्ठति । अलका ध्यानं विसृजति ।]

न जाने दक्षिणनेत्रं किं स्फुरति । नश्यतु दुःखं भवतु च सुखम् । आगते नाथे—

कालिदासः—पार्श्वतश्च तिष्ठत्यपि—

अलका—(सलज्जं ससंभ्रममुत्थाय) कदा कृतमागमनम् । न ज्ञातमपि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः – अधुना पतिदेवादपीमे देवाः प्रियतरा ननु । भवतु । दक्षिणनेत्रस्पन्दनसूचितं शुभवृत्तान्तं कथयामि ।

अलका – किमेतत् । मया त्वनुमितमशुभा वार्ता काचिदागतेति । यतो वसन्तोत्सवः प्रतिषिद्धो महाराजेनेति श्रूयते ।

कालिदासः – तदपि तदेव ।

अलका – किं किमेव । नैवं कूटवद् वक्तव्यम् । विशदं कथयितुमर्हति भवान् ।

कालिदासः – महाराजेन वसन्तोत्सवः प्रतिषिद्ध इति यत्त्वया श्रुतं तत्सत्यमेव ।

अलका – कथमनारब्ध एव प्रतिषिद्धः ।

कालिदासः –

उज्जयिन्यां राजधान्यां न मे यावदुपस्थितिः ।
तावत्कालं नृपतिना प्रतिषिद्धो महोत्सवः ॥ ४१ ॥

अलका – (ससंभ्रमम्)–इदमधिकतरं कूटम् । कुतो भवतोऽनुपस्थितिः । कुत्र गम्यते ।

कालिदासः – शान्तं शान्तम् । विदर्भान् प्रति राजदूतत्वेन गन्तुमादिष्टोऽहं महाराजेन ।

अलका – कोऽयं दुष्टो येन दूरदेशे भवत्प्रेषणेनात्मा शान्तिं नीतः ।

कालिदासः – बहुमानोऽयं मे मुग्धे । अत्र गुरुकार्यविन्यासेन गौरवं प्रापितोऽयं जनो महाराजेन ।

अलका – केन सूचितं भवन्नाम दूतकार्ये ।

कालिदासः – किमेतेन विदितेन ।

अलका – तथापि कथयतु भवान् ।

कालिदासः – महादेव्या वसुधया ।

अलका – नाथ । न तस्यै रोचते भवत्काव्यस्य प्रभावः । अतो दूरीक्रियसे तया ।

कालिदासः – ततः किं भवेत् ।

अलका – भवदनुपस्थितौ न स्मरिष्यति भवन्तं महाराजः । एकदा विस्मृतौ–

कालिदासः – नैतन्नितरां संभवति । प्रिये न जानासीमं विक्रमादित्यभूपम् । नैष पृथग्जनः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(पहाडी, धुमाळी)

भूगतो ननु पूषा । दिविषदां भूषा ॥ ध्रु० ॥
सुखदकरदया निखिलजनानाम् । विहिता सुलभाऽशेषा ॥
प्रजासु कुरुते प्रीतिं स यथा । न तथा नाथे योषा ॥
श्रेष्ठगुणानां जगति विधात्रा । जनितैषा मंजूषा ॥ ४२ ॥

अलका – अत एव प्रतिषिद्धो महोत्सवो महाराजेन ?

कालिदासः – एवमेव ।

अलका – भवतु । भवत्प्रवसनं निश्चितमेव । अतो मयापि सहधर्मचारिण्या भवाननुगन्तव्यः । तदनुजानीहि ।

कालिदासः – (सवैलक्ष्यं) मैवम् । न सुखदोऽध्वा । न चापि निकटवर्ती विदर्भदेशः । न च सोऽपि मित्रत्वेन निबद्धः । अतो न ते गमनमनुमन्तुं शक्तः । नाहमपि सुखाशया निर्गच्छामि । राष्ट्रकार्यपरवश एवाहं तत्र गन्तुं प्रवृत्तः ।

अलका – नाहमपि भवत्संगतिं विना सुखान्तरमीहे । भवतः सहवासे सर्वमेव मे सुखावहम् ।

(दिण्डी, दादरा)

संगतौ ते निर्वृत्ता नाथ भार्या
कुसुमसुकुमाराः कण्टकास्तदा मे ।
विना नाथं मे कुतो बत सुखाशा
कथं जीवेद्वा जलं विना मीना ॥ ४३ ॥

तव संगतौ नाथ वनमप्युपवनं भवेत् । तद्दीयतामेष वरो याचिकायै ।

कालिदासः – (व्यग्रमनाः) प्रिये, मैवम् । सर्वथैवमेव दृष्टचरं यद् वीरो विजयाय व्रजति । वीराङ्गना स्वागतसिद्धा निलये निवसति ।

अलका – मैवमार्य । राजकन्या वैदेही श्रीरामचन्द्रमनुसृता ।

कालिदासः – ततश्च रामायणं संभूतम् । नैतदिच्छसि ?

अलका – भवेदत्र च कालिदासायनम् ।

कालिदासः – (कठोरतया) प्रिये नैतत्संभवति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका – (हताशतया) रे हतदुर्दैव,

(असावरी, त्रितालः)

सुखिनी न च ललना । विरहिणी ॥ धृ० ॥
जलदं सौदामिनी विनेयं
विना च रविणा नलिनी सायं
कथं ह्यनाथा बत जीवेयं
को नु सान्त्वयेन्मां त्वया विना ॥ ४४ ॥

कालिदासः – रघुनाथ । [रघुनाथः प्रविशति ।] श्वो मया सह त्वया विदर्भा गन्तव्याः । तत्प्रवाससाहित्यं सज्जीकुरु । [रघुनाथो निष्क्रान्तः ।]

अलका – ननु देवरोऽपि गच्छति ।

कालिदासः – बाढम् । विश्वासार्हः कोऽपि पुरुषो दूरदेशगमने सहचर आवश्यकः ।

अलका – एतदपि साधु । मया तु कथमत्र दिनानि यापनीयानि ।

कालिदासः – न मन्तव्यं त्वद्वियोगान्मे जीवनं सुखकरमिति । किन्तु देशकार्ये व्यक्तिसौख्यमाहवनीयम् ।

(खमाजः, त्रितालः)

दुरितवृता विभवयुता प्रियसखि निजभूमाता ॥
समयोऽयं वरतनयाव् जननीसेवां नेता ॥ धृ० ॥
प्रेमपाशनाशैरपि समरं वीरो याता ।
सखि सदने वासमितो न च सहते रिपुजेता ॥ ४५ ॥

रघुनाथ । [रघुनाथः प्रविशति ।] अहमग्रतो गच्छामि । सर्वं सन्देशादि कार्यालयाद् ग्रहीतव्यम् । भवानपि सज्जो भूत्वा तत्र शीघ्रमागच्छतु । [निष्क्रान्तः ।]

रघुनाथः – आर्ये गच्छामि प्रवाससज्जतां विधातुम् ।

अलका – वत्स, संकटप्रायोऽयं प्रवासः । तदवहितेन भवितव्यम् ।

रघुनाथः – यथाज्ञापयति देवी । [निष्क्रान्तः ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका –

(जोगी, त्रितालः)

देव तव चरणरजसि विलीना
विपदि निपतिता दासी दीना ॥ धृ० ॥
सुदूरदेशं प्रयाति भर्ता
त्वया विना न च रक्षणकर्ता
महाकाल ! अबला त्वदधीना ॥ ४६ ॥

[निष्क्रान्ता ।]

इति प्रथमोऽङ्कः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

— २ —

द्वितीयोऽङ्कः ।

[विदर्भनृपतेः प्रासादे नृपकार्यमन्दिरम् । संत्रस्तः सचिन्तो विदर्भेशो गतागतं करोति ।]

चारणः—(नेपथ्ये)

यस्य प्रजा निहतशत्रुगणा विचिन्ता
जीवन्ति निष्कपशुसस्यधनैः समृद्धाः ।
पौत्रप्रपौत्रनिवहैः प्रसभं विरूढाः
सोऽयं प्रजाहितरतो नृपतिः सुकीर्तिः ॥ १ ॥

द्वितीयः—(नेपथ्ये)

नदति विबुधवासे दुन्दुभिर्यस्य कीर्ते-
र्वदति कविजनो यं शारदापादभृङ्गम् ।
सकलविपुलकोशा याचकेभ्यश्च यस्य
स इह वहति भूपो राज्यभारं सुकीर्तिः ॥ २ ॥

सुकीर्तिः—कः कोऽत्र भोः ।

द्वारपालः—(प्रविश्य) आज्ञापयतु देवः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुकीर्तिः—चक्रधर, कथं न सचिवोत्तमो विष्णुपादोऽद्यापि प्रवेशितः । नन्वाहूतोऽसौ ।

द्वारपालः—पृच्छामि प्रवेशयामि च देवं । [निष्क्रान्तः ।]

सुकीर्तिः—(स्वगतं) मालवराजस्य दूतः कालिदासोऽत्रागच्छति । न तु वयं जानीमस्तत्रेङ्गितम् । न निश्चेतुं तथा समर्था यत्स मालवेशः सुहृद्भावेन वर्तते विपरीतेन वा । [विष्णुपादः प्रविशति ।] सचिवोत्तम, अपि ज्ञातं किंचन मालवराजदूतात् ।

विष्णुपादः—देव, विदर्भैः सह सख्यं संपादयितुमेव प्रेषितोऽहमित्येव तद्वचनम् ।

सुकीर्तिः—केनापि गुप्तचरेण किंचिदावेदितम् ?

विष्णुपादः—न हि महाराज ।

सुकीर्तिः—अस्माभिः कोसलाधिपतिरत्र निमन्त्रितः । कथं तस्मिन्नेव काले मालवेशदूतोऽत्रायाति ।

विष्णुपादः—कोसलाधिपतेरत्रागमनं न रहस्यमासीत् ।

सुकीर्तिः—कस्तु हेतुस्तस्मिन्नेव समये कालिदासागमने ।

विष्णुपादः—न तज्जानीमः । मन्ये सन्धिप्रस्थापनार्थमेव स आगत इति ।

सुकीर्तिः—सचिवोत्तम, वृद्धस्त्वमधुना । न राज्यकार्ये तेऽभिनिवेशः । इदमपि चिन्तनीयं यत्कथमेष मैत्रप्रणयो मालवराजेनास्मिन्नेव काले समारब्धः ।

विष्णुपादः—प्रसीदतु देवः । भवत्कुलसेवायां मदीयकुलेन धन्यता प्राप्ता । अहमप्याशैशवात् सेवावृत्त्याऽत्र स्थितः । भवत्पितृदेवेनैव सचिवप्रमुखत्वे स्थापितः । यदि मन्यते भवान् न सेवायायलमयं जनस्तत्कार्यसंन्यासमनुमन्तुमर्हति मे देवः ।

सुकीर्तिः—मैवं मंस्थाः सचिवोत्तम । जानीमो भवतः सेवाव्रतम् । स कालिदास एवात्रानेतव्यः । तमेव सर्वं विशदं पृच्छामः ।

विष्णुपादः—यथाज्ञापयति देवः । [निष्क्रान्तः ।]

द्वारपालः—(प्रविश्य) प्रणिधिराम्रपालो द्वारि समुपस्थितः । भवन्तं द्रष्टुमीहते ।

सुकीर्तिः—प्रवेशयैनम् । [द्वारपालो गत्वाऽऽम्रपालं प्रवेशयति ।] को वृत्तान्त आम्रपाल ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आम्रपालः—जयतु देवः । नगरे कावपि द्विजौ मालवदेशात् समागतौ दृष्टौ । ताभ्यां सह मैत्रं संपाद्य काश्चित् कथाः कृताः । वदतस्तौ कालिदासनामाऽत्रागतो राजदूतो न वास्तविकः । गुप्तचर एषः ।

सुकीर्तिः—कुत्र तौ विप्रौ ।

आम्रपालः—नगरचतुष्के संचरतः ।

सुकीर्तिः—आनयात्र तौ ।

आम्रपालः—यथाज्ञापयति महाराजः । [निष्क्रान्तः ।]

[विष्णुपादः कालिदासश्च प्रविशतः ।]

विष्णुपादः—इत इतो भवान् । अयमस्माकं देवो भवन्तं प्रतीक्षते । प्रणम्यतामेषः ।

कालिदासः—

नतो न मूर्धैष कुतोऽपि राजन्
अन्यत्र भो उज्जयिनीशपादात् ।
अन्येन चापो न विनामितोऽभूच्
श्रीरामचन्द्रान्मिथिलानगर्याम् ॥ ३ ॥

विदर्भेश्वर, स्वस्ति भवते ।

सुकीर्तिः—श्रुतमासीदस्माभिर्भवत्काव्यशक्तिवर्णनम् । अस्थाने तु खल्विदं तत्प्रदर्शनम् ।

न मन्तव्यं काव्यं मृतमिह विदर्भेष्विति कवे
भवेयुर्नो दास्यः कविवरजये शक्तमतयः ।
न वेदं मन्तव्यं कवितशिथिला अस्मदिषवो
भवेयुः पर्याप्ता अविरतसृता मालवलये ॥ ४ ॥

कालिदासः—किमेभिरधरोत्तरवचोभिः । मालवराजसन्देशं भवान् जानाति । भवत्प्रत्युत्तरं गृहीत्वा प्रतिनिवर्तितुमिच्छामि ।

सुकीर्तिः—केन हेतुनाऽस्मिन्नवसरे सन्देश एष प्रेषितो मालवेश्वरेण ।

कालिदासः—सर्वं तत्कथितमेव मया तथापि तस्यैव शब्दैः पुनः कथयामि । तेन प्रजाहितरतेन करुणाकरेण सन्दिष्टं—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रजा याः पुत्रवत् प्रेम्णा पालिता लालिता मया ।
न तासां हननं द्रष्टुमुत्सहेऽहं निरागसाम् ॥ ५ ॥

इदमपि चोक्तं तेन शूरेण—

यदि न च परिहार्यः संगरः सर्वयत्नैः
समरचतुरसेना नः सदा सिद्धशस्त्रा ।
अनुभवतु स नित्यं सौहृदं स्वेच्छया नो
न तु विभवविनाशं श्रीविदर्भावनीशः ॥ ६ ॥

सुकीर्तिः—साधूक्तम् । न पुनः प्रयोजनं पश्यामोऽधुनैव मैत्रयाचने ।

कालिदासः—मैत्रयाचनम्? न याचको मालवराजो भवद्द्वारि । प्रजाहितविरुद्धमाचरणं न भवता कर्तव्यमिति स संदिशति ।

सुकीर्तिः—किमौचित्यं सन्देशस्यास्यात्र । न कोऽपि राजा प्रजाहितविरोधि समाचरति । किमेवं च विपरीताचरणमभिप्रेतं भवतो राज्ञा ।

कालिदासः—अस्मत्प्रदेशापहारो युद्धं च ।

सुकीर्तिः—अधिकप्रदेशार्जनं प्रजाहितायैव । न चेदं विना युद्धं संभवति । तत्कथं युद्धं प्रजाहितविरोधि मन्यते मालवेशः ।

कालिदासः—युद्धे जीवितवित्तहानिरपरिमिताऽपूर्वदृष्टा च । कथमेतल्लाभकरं स्यात् ।

सुकीर्तिः—तर्हि मन्यामहे न युद्धमाश्रयेन्मालवेशः ?

कालिदासः—अन्यायनिवारणे युद्धं यदावश्यं भविष्यति तदा मालवसेना सज्जैव ।

स्वदेशरक्षणे तद्वत् प्रजापीडानिवारणे ।
अवश्यं यदि चेद् युद्धं तत्करिष्यति मालवः ॥ ७ ॥

सुकीर्तिः—प्रायो न युद्धशूरो मालवराज इति मे विभाति ।

कालिदासः—(सक्रोधं) कथमेवं मन्यते कुतर्कितं भवता ।

वयं न मरणाद् भीता विक्रमादित्यशासने ।
उदिते गगने मित्रे ध्वान्तभीतिः कुतो भुवि ॥ ८ ॥

सुकीर्तिः—एवं सति भवदभीप्सिते, युद्धवर्जनसन्देशस्त्वलीक एव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—शृणोतु भवांस्तर्हि श्रोतव्यम् ।

विदिशाशासने शश्वत् कोसलाधिपतेः स्पृहा ।
मालवांशस्तु विदिशा न युद्धेऽपि जिता परैः ॥ ९ ॥

सुकीर्तिः—कथं पुनर्ज्ञातं वयमस्मिन् कर्मणि कोसलसहाया इति ।

कालिदासः—(विहस्य) चारचक्षुषो राजानः । पररहस्यभेदो राजनीतेः प्रथमो विन्यासः ।

सुकीर्तिः—न तर्हि राजदूतो भवान् । गुप्तचर इतीव प्रतिभासि । देहान्तशासनमेवात्र शास्त्रपूतम् ।

कालिदासः—काममेव शासनं वितरतु विदर्भाधिपः । न तेन मे भीतिः कार्यनाशो वा । मालवशत्रुत्वमेव भवतैतावता तु लब्धं स्यात् । राजदूतवधेन राजमण्डले घृणा च । प्रभवति खलु भवान्मम जीवितस्येदानीम् । तथापि—

यत्कर्तव्यं तद्विमृश्यैव कार्यं
नाशो नित्यो वैपरीत्येन वृत्तौ ।
नेदं श्लाघ्यं यद्धि भूपाविवेकै-
र्दुःखाधेयः सर्वलोको ह्यनागाः ॥ १० ॥

सुकीर्तिः—(क्रोधेन) अन्येषु वितीर्यतामयमुपदेशः । नास्मासु युक्त एषः ।

जानीम आत्मनः श्रेयो जानीमश्च प्रजाहितम् ।
न पाठ्यं तद्विदर्भेषु मालवेश्वरपण्डितैः ॥ ११ ॥

सचिवोत्तम, बन्धने निक्षिप्यतामयं प्रणिधिः ।

कालिदासः—

आमन्त्रये त्वां विदर्भेश राजन्
युद्धावनौ स्यात् पुनर्मीलनं नौ ।
जीवंस्तु नूनं सदाहं यतेय
मैत्रे विदर्भैश्चिरं मालवानाम् ॥ १२ ॥

[विष्णुपादः कालिदासेन सह निष्क्रान्तः ।]

सुकीर्तिः—न जाने किं सत्यं किमत्र मिथ्या वा । [विष्णुपादः पुनः प्रविशति ।]

सचिवोत्तम, न कमपि सन्देशं कालिदासादुज्जयिनीं प्रेषयितुमनुजानीमः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विष्णुपादः—एवं करिष्यामि ।

सुकीर्तिः—अपि किं विधेयं मालवमनोगतविज्ञाने । कथमयं कालिदासः सर्वं कथयेत् ।

विष्णुपादः—कोऽपि प्रणिधिस्तत्र नियोज्यः ।

सुकीर्तिः—अस्ति कापि दासी या कविं मोहयितुं समर्था ।

विष्णुपादः—(विमृश्य) नात्र दासी समर्था । सरस्वती कदाचिदिदं कुर्यात् । पण्डिता चतुरा च सा ।

सुकीर्तिः—या कोसलाधिपतिना प्रहिता सांप्रतं महादेवीसांनिध्ये वर्तते सा ननु ? साधु । तामितः प्रेषयतु भवान् । अहमेव तामाज्ञापयिष्ये ।

[निष्क्रान्तः ।]

विष्णुपादः—यथाज्ञापयति देवः ।

आम्रपालः—(प्रविश्य) जयतु देवः । आनीतौ तौ विप्रौ ।

सुकीर्तिः—प्रवेशय ।

[निष्क्रम्य, सैनिकवेषेण गोपालेन, गोविन्देन सह च पुनः प्रविश्य]

आम्रपालः—जयतु देवः । आनीतौ तौ यात्रिकौ । (तौ प्रति) अयं विदर्भेशः प्रणम्यताम् । स भवन्तौ सभाजयित्वा दक्षिणामपि दास्यति ।

गोविन्दगोपालौ—साष्टाङ्गप्रणतिरियं भवच्चरणयोः । (तथा कृत्वा) स्वस्ति भवते ।

सुकीर्तिः—कथं द्विजः सैनिकः । कौ भो भवन्तौ ।

गोपालः—(भीतः स्खलितवाग् गोपालं प्रति) त—त्वं ब्रूहि ।

गोविन्दः—(तथैव)—त्वं प्रथमः । त्वं ब्रूहि ।

सुकीर्तिः—उच्यतां त्वरितं विना भयम् ।

गोपालः—अ—अयं गोविन्दः—

गोविन्दः—अ—अयं—गोपालः—

सुकीर्तिः—(तर्जयन्) किमत्र कुरुतः ।

गोपालः—न—न हि न हि ।

गोविन्दः—न—न हि ।

आम्रपालः—(पुरः सृत्वा) किं न हि । निवेद्यतामशेषम् । कुत्र गम्यते ।

गोपालः—उज्जयिनीस्थौ रामगिरियात्रां चरावः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



सरस्वती
(कु. पुष्पा नारगोळकर)

सुकीर्ति :
(श्री. राम बापट)

[१९-११-१९६१]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोविन्दः—एवमेव ।

सुकीर्तिः—आम्रपाल, धनं किंचिद्देयमस्माभिर्द्विजाभ्यां यात्रिकाभ्याम् । गोपाल, किं जानासि कालिदाससंबन्धि ।

गोपालः—न किंचिदपि ।

गोविन्दः—एवमेव ।

सुकीर्तिः—कथं न किमपि । उज्जयिनीस्थो महापण्डित एषः । मालवेन्द्रेण राजदूतत्वेन प्रेषितो विदर्भेषु । कथं न जानीथः ।

गोपालः—(सोल्लासं) स्मरामि देव, अधुना । कथयामि—

गोविन्दः—(तथैव) अहं जानामि देव । कथयामि—

गोपालः—(तं पृष्ठतः कृत्वा) अहं कथयामि—

गोविन्दः—(तमपसार्य) अहमेव कथयामि—

आम्रपालः—किमिदं क्रियते । तूष्णीं तिष्ठ गोविन्द । गोपाल, त्वमेव कथय ।

गोपालः—(भीतः) न हि न हि । गोविन्दः कथयति ।

गोविन्दः—(तथैव) गोपालः कथयति ।

सुकीर्तिः—आम्रपाल, मूर्खाविमौ मे प्रतिभासेते । तद्दण्डमर्हतः । आनय शस्त्रवन्तं रक्षकम् ।

गोपालः—(ससंभ्रमं) कथयामि—

गोविन्दः—(तथैव) कथयामि—

गोपालः—श्रूयते स गुप्तचर इति ।

सुकीर्तिः—कुत्र श्रुतमेवम् ।

गोविन्दः—अत्रैव ।

सुकीर्तिः—निष्कासयैतौ मूर्खौ, आम्रपाल । [सरस्वत्या सह विष्णुपादः प्रविशति ।]

विष्णुपादः—सरस्वति, उपसृत्य वन्दस्व देवम् । [सरस्वती तथा करोति ।]

सरस्वती—जयतु देवः ।

गोपालः—(जनान्तिकं) कुण्डिनपुरसौन्दर्यमुज्जयिनीतो रम्यतरं दृश्यते ।

सुकीर्तिः—अपनयैतौ, आम्रपाल । कथं रे गोपाल, तव सैनिकवेषः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—यात्रामार्गे चोरस्तेनादिभयम् । अत एष वेषः ।

आम्रपालः—आगम्यताम् । [तौ गृहीत्वा निष्क्रान्तः ।]

सुकीर्तिः—अष्टप्रहराधिकं नात्र स्थातव्यमाभ्याम् ।

आम्रपालः—यथाज्ञापयति देवः ।

सुकीर्तिः—का त्वं सरस्वति । कुत आयाता ।

सरस्वती—विदिशाकन्याऽहम् । कोसलाधिपतिनात्रानीता । विदिशां प्रतिगन्तुमीहे ।

सुकीर्तिः—सचिवोत्तमेन किंचित्कथितं ते ।

सरस्वती—कथितं देव ।

सुकीर्तिः—तत्करिष्यस्येतत् ? [सा तूष्णीं तिष्ठति ।] कथं मौनमेतत् ? अभयं ते । विस्रब्धं ब्रूहि वत्से ।

सरस्वती—उत्तमकुलजाऽहम् । नाधमकृत्ये प्रवर्ते ।

सुकीर्तिः—नायं सुकीर्तिरप्यधमकृत्यं कस्माच्चनापेक्षते । का ते चिन्ता ।

सरस्वती—नाहमभिसारिका भवेयम् ।

सुकीर्तिः—नैतदभिप्रेतम् । अपि तु चतुरा त्वं जानास्येतत्, 'आत्मानं सततं रक्षेत्प्राणैरपि धनैरपि' इति । केनचित्कार्येण निजस्वातन्त्र्यं क्रीणीहि ।

सरस्वती—इदमपि जानामि देव । 'एवं कुलीना व्यसनाभिभूता न नीचकर्माणि समाचरन्ति' इति ।

सुकीर्तिः—न सुष्ठु ज्ञातं त्वया यत्करणीयम् ।

सरस्वती—किमेतत् ।

सुकीर्तिः—उज्जयिन्याः पण्डितः कालिदास इह राजदूतत्वेनागतः । तस्य कार्यस्य सत्यस्वरूपं ज्ञातुमिच्छामि ।

सरस्वती—श्रुतं तस्य नाम विदिशानिवासिनानेन जनेन ।

सुकीर्तिः—भवती तस्य बन्धावासं गच्छतु । तं काव्यनृत्यगीतादिभिः प्रीणयतु । सत्यरूपं ज्ञात्वा मे निवेदयतु च ।

सरस्वती—न तादृशो महाभागो मिथ्यारूपं वृणुयात् ।

सुकीर्तिः—तदेव निश्चेतुं मे मनीषा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती—कथं मया वर्तितव्यम् । कश्च मे रक्षणे नियुक्तः । कथं वा बन्धागारं प्रवेष्टुं क्षमा ।

सुकीर्तिः—तत्सर्वं विधास्यामः ।

सरस्वती—न मेऽवमानः केनचित्कार्यः । यच्च मया क्रियते तत्प्रमाणं भवितुमर्हति ।

सुकीर्तिः—युज्यते ।

सरस्वती—अहं च कार्यानन्तरं ममाभिमतेन परिजनेन सह विदिशां प्रेषणीया ।

सुकीर्तिः—प्रतिश्रुतम् ।

सरस्वती—साधयामि देव ।

सुकीर्तिः—यदि कालिदासोऽस्मत्पक्षमायाति—

सरस्वती—नैतत्संभवेत् । नाहं च तत्र प्रयतिष्ये ।

सुकीर्तिः—बाढम् । (अङ्गुल्या मुद्रामपनीय) गृहाणेमामङ्गुलिमुद्राम् । सा तव पन्थानं विदर्भेष्वकुतोभयं करिष्यति ।

सरस्वती—अनुगृहीतास्मि ।

सुकीर्तिः—सचिवोत्तम, नयेमां कन्यकाम् ।

विष्णुपादः—यथाज्ञापयति देवः । [सर्वे निष्क्रान्ताः ।]

[ततः प्रविशतः कुण्डिनपुरे बहिःप्रासादं गोविन्दगोपालौ ।]

गोविन्दः—कथं त्वं भीतो गोपाल, विदर्भेशपुरतः ।

गोपालः—को भीतः । नाहं भीतः । त्वं भीतः ।

गोविन्दः—तत् किं मम पृष्ठत एव स्थितः ।

गोपालः—त्वं ज्यायानिति ।

गोविन्दः—पण्डितराजेन तु देवीवसुधासमक्षं त्वमस्मिन् कार्ये नियुक्तः ।

गोपालः—त्वमपि मया सार्धं प्रेषितः ।

गोविन्दः—तत्केवलं तव दुराराध्यतया । अहं मदनिकां हरेयमिति भीत्या त्वया मम सहवासे निर्बन्धः कृतः । अतस्तव सहचरोऽयं देहः ।

गोपालः—किं त्वं करिष्यसि मदनिकाविषये । पश्य मम सैनिकवेषम् । कापि सुन्दरी समागच्छतु । मां वरितुमातुरोत्कण्ठिता च भविष्यति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोविन्दः—अत्र सौन्दर्यमपि प्रमादजनकमिव ।

गोपालः—सौन्दर्ये न प्रमादः संभवति । रसिकत्वं तु स्यात् । (सरस्वती प्रविशति ।) पश्येमां सुन्दरीं मदवलोकनमुग्धाम् । तामुज्जयिनीं हरिष्यामि ।

गोविन्दः—कथं त्वं हरसि । अस्ति ते मदनिका । अहमेवात्र यतिष्ये ।

गोपालः—न सा त्वां द्रक्ष्यत्यपि । अपि च एकस्यापि वीरस्य प्रणयिनीबाहुल्यं न दोषाय ।

सरस्वती—(स्वगतं) इदं मुद्राङ्कितमङ्गुलीयकं सुष्ठु समधिगतम् । तेन हि मे कार्यं सुकरं स्यात् ।

गोपालः—पश्य गोविन्द, अङ्गुलीयकं प्रदर्शयति । (उपसृत्य) चन्द्रिके ।

सरस्वती—(तौ दृष्ट्वा) कौ भवन्तौ ।

गोपालः—अहमुज्जयिन्यभिजनो गोपालः ।

गोविन्दः—(तमपसार्य) अहमपि गोविन्दः ।

गोपालः—मया भवती प्रथमं दृष्टा ।

गोविन्दः—मयैव प्रथमं निरीक्षिता ।

गोपालः—मया प्रथमं भाषिता ।

गोविन्दः—मयैव प्रथममभिलषिता ।

सरस्वती—यदि भवन्तावुज्जयिनीस्थौ तर्हि कालिदासं जानीतः ।

गोपालः—न स भवतीवेदनार्हः ।

सरस्वती—कीदृशोऽसौ ।

गोपालः—कुरूपोऽप्रियश्च ।

सरस्वती—ननु कवीश्वर एषः ।

गोपालः—करोति काव्यम् । न कोऽपि शृणोति तत् ।

सरस्वती—ननु प्रियभाषकोऽसौ ?

गोपालः—वञ्चकः सः ।

सरस्वती—न भवते रोचतेऽसौ ?

गोपालः—कथं रोचेत । न सा सुन्दरी । पश्य कामिनि, कीदृशं मे रूपम् ।

गोविन्दः—(पुरः सृत्वा) कथं मे दर्शनम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—मा तमवलोकय । तस्य दर्शनेनैवाम्लिकासेवनेनेव वदनमाम्लतां यास्यति ।

गोविन्दः—अस्य शब्दश्रवणेन च कर्णौ कटू भविष्यतः ।

सरस्वती—भवतु तत् । कुत्र वर्तते स कालिदास इदानीम् ।

गोपालः—विदर्भेष्वेव । अतो भवती ननूज्जयिनीं मया सार्धं गन्तुमर्हति ।

सरस्वती—कथं सोऽत्रस्थः ?

गोपालः—राजदूतत्वेनागतः ।

सरस्वती—किं तत्र प्रयोजनम् ।

गोपालः—किमनेन शुष्कवचनविन्यासेन ।

सरस्वती—गच्छामि तस्य दर्शनाय ।

गोपालः—कथं यास्यसि । नैतद् दुष्कर्म कर्तुं भवत्यर्हति । नाहं च तदनुजानीयाम् ।

सरस्वती—कस्त्वमनुज्ञानेऽननुज्ञाने वा ।

गोपालः—तव लाभार्थी ।

सरस्वती—गम्यतामन्विष्यतां चान्या काचित् ।

गोविन्दः—साधु तेऽवधीरणा । मामेव भवती वाञ्छति ।

गोपालः—कथं त्वामजागलस्तनवद्दुर्बलमीहेत । (तामुपगत्य तर्जयन्निव) वद शीघ्रं त्वं मां कथं नानुनयसि ।

सरस्वती—कीदृशी तवाभीप्सिता ललना ?

गोपालः—शृणुष्व ।

पङ्कजानना चञ्चलनयना भृङ्गगुञ्जना प्रियाङ्गना ।
विपुलकुन्तला विशालभाला प्रशान्तशुभदर्शना ॥
कम्बुकन्धरा सुविम्बाधरा मधुरा प्रोन्नतपयोधरा ।
विभ्रमललिता करपल्लविता वल्लरीप्सिता पुष्पभरा ॥
रम्भोरुघना गजेन्द्रगमना प्रियललना नलिनीचरणा ।
सिंहमध्यमा मङ्गलधामा धवलरक्तिमान्वितवर्णा ॥
आगामिन्या मम कामिन्या यामिन्यामपि विभोज्ज्वला ।
भवतु हि वन्या, न च नृपकन्या, धन्या संसृतिरिहाखिला ॥१३॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती—नाहं त्वदनुरूपा यतो नाहमीदृशी ।

गोपालः—(तस्या हस्तं बलेन गृहीत्वा) यथाकालं भविष्यसि ।

सरस्वती—मुञ्च मामविनीत ।

गोपालः—न मुञ्चामि यद्ययोध्यापती रघुनाथोऽपि मां तर्जयति ।

सरस्वती—भोः प्रभो रघुनाथ । मोचय माम् ।

रघुनाथः—(असिहस्तः प्रविश्य) को मामाह्वयति । अपसरतं दुष्टौ । (अभिज्ञाय) गोपाल, गोविन्द, किमेतत् । [तौ सभयं निष्क्रान्तौ ।]

सरस्वती—(तं सस्पृहं विलोकयन्ती) को भवान् ।

रघुनाथः—(तां विलोक्य प्रीतः) त्वयैवाहूतो ननु ।

सरस्वती—कथमिव ।

रघुनाथः—रघुनाथ इति जनोऽयमभिधीयते ।

सरस्वती—मया तु देवो रघुनाथः प्रार्थितः ।

रघुनाथः—मनुजरूपेणैव देवोऽप्यायाति । भवतु तत् । कार्यव्यग्रतयाऽन्यत्र शीघ्रं गन्तव्यं मया । अपसृतौ तौ दुर्जनौ । तद्यदि भवत्यधुनाऽऽत्मनैव संचरणे क्षमा तद्गच्छामि ।

सरस्वती—कथं पुनर्दर्शनं स्यात् ।

रघुनाथः—एवमेव नियतीच्छया । [निष्क्रान्तः ।]

सरस्वती—

(खंबावती, त्रितालः)

महानरवीरता चरिता ।
रमणीमानसमोहिनी मता ॥ ध्रु० ॥
प्रेमयाचनैर्जिता न ललना ।
शूरपथे सा माला लुलिता ॥ १४ ॥ [निष्क्रान्ता ।]

[ततः प्रविशति कालिदासः पटनिर्मितबन्धावासे संचरन्नितस्ततश्चिन्ताक्रान्तो विमनायमानः ।]

कालिदासः—विक्रमादित्यमहाराजो निभृतं विश्रब्धो मयि । मया तु स वञ्चित एव । विदर्भेश्वराय विदिशाविषये मालवाधिपमनीषितं निवेदितं मया । राजा सुकीर्तिर्न मूढो विवेकशून्यो वा । तेन ज्ञातमेव यन्न विदिशा मालवदेशाद्विलग्ना त्रुटिता

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भवेत्। न वापि कोसलेश्वरस्तां लभेतेति। तथापीदं विदर्भकोसलानां विदिशारहस्यं मालवनृपेण ज्ञातव्यमेव। तदा सेना सज्जा स्थास्यति विदिशासंरक्षणे चास्मन्निश्चयः प्रथितो भवेत्। कथं तु विदिशारहस्यसन्देशो विदर्भावनेरुज्जयिनीं प्रापणीयः। किं नूज्जयिन्यां वर्तते। मम वृत्तान्तमलभमानाऽलका कथं जीवनं व्यतीयात्। मासत्रयाधिकः कालो निर्गतः। कोऽपि बलवांश्चिन्ताव्यतिकरस्तां बाधेत। कोऽपि मनस्तापस्तां विनिद्रां विदध्यात्। ननु मम वृत्तान्तातुरा देहल्यां तिष्ठेत्। तथा च नभः पश्येत्। न किमपि सान्त्वनमधिगच्छेत्।

एक एष मेघस्त्वरया पश्चिमां दिशमुपगच्छति। रे पयोधर, सागरमग्नं दिवसनाथमुद्धर्तुं नु प्रतीचीमुपयासि। रे वारिवाह, अथवा विरहशोकार्तां प्रतीचीमाश्वासयितुं नु जवेन परिक्रमसे। तर्हि शुभास्ते पन्थानः सन्तु। सर्वमनुकूलमेव ते।

मन्दं मन्दं वहति पवनः श्रान्तपीडापनोदो
वृक्षे वृक्षे कुसुमनिचयैर्गन्धितः स्पर्शशीतः।
एको मेघ प्रचलसि नभः सागरे नौरिव त्वं
दुःखार्तानां विपदपनये सज्जनानां प्रयत्नः॥ १५॥

एवं सति रे अम्भोद, कथं मां विपन्नं न पश्यसि।

सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर नरपतिस्नेहविश्लेषितस्य।
आश्वास्या सा युवतिरलका कालिदासस्य पत्नी
श्रान्ता दीना विरहविकला जीवितेशैकचित्ता॥ १६॥

(नेपथ्ये मेघनादः।) किं गर्जसि। कथमेतत् त्वया कार्यमिति?। भो विद्युत्पते, भवान् सर्वलोकस्य जीवनं बिभर्ति। तत्कथं मे सन्देशं नीत्वा, न तव भ्रातृजाया-जीवनं कुसुमपेलवमाशाबन्धेन दृढीकरोषि। सखे,

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥ १७॥

---

१ मेघदूते १-६.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्द्रमपि वहसि । अप्रतिहतसंचारेण नभः पराक्रमसे । अतः श्यामवर्णमपि सरसान्तःकरणं त्वामुपगतोऽहम् । तत् सफलीकुरुष्व ममाशाम् ।

कथमुदीचीमपि प्रयासि । ननु हनूमता दक्षिणस्यां दिशि प्रस्थापितं द्रोणाचलं पुनरुदीच्यां दिशि वहसि ? अथवा पुष्पकमिदं दर्शनार्थिना श्रीरामचन्द्रेण प्रेषितं विभीषणमयोध्यां नेतुम् ? ननु रामेश्वरजलं गङ्गायै समर्पयितुं वहसि ? अथवा रामसेतुं कृष्णप्रस्तरं हिमवत्सदने नयसि ? ननु रामगिरितो यक्षपुरीं भजसि ? एवमेव भवितुमर्हति । शापभ्रष्टो यक्षो नु भवान् ? अथवा केवलं सन्देशं कस्यापि यक्षस्य हरसि ?

यदि पश्चिमोदीचीं यासि तर्हि रे अम्बुधर, नैतन्मत्कार्यं दुष्करं ते । महाकाल-दर्शनेप्सुर्भवानुज्जयिनीमवश्यं प्रयाति । तत्र धूपधूमैर्दीपज्योतिर्भिस्तीर्थसलिलैर्मरुद्गणैश्च प्रीतो धूमज्योतिःसलिलमरुतां सन्निपातो भवांस्तैरापै रममाणो मा ममालकामुज्जयिनीस्थां विस्मरतु । ननु पश्येदिमं त्वां सा । प्रिये मयैव प्रेषितोऽयं मेघो दूतः । मा भैषीः ।

प्रिये अलके—[सरस्वती प्रविशति ।] (ससंभ्रमं)—कथं त्वमत्र—(प्रमादं विज्ञाय तीव्रस्वरेण) का भवती । कस्मादत्रागता । (मार्दवेन) देवतावद् विपदि कथमवतीर्णा । (किंचिद् विरम्य) वदतु भवती किंचित् । न सरस्वत्येव रुष्टा त्वयि यन्न शब्दोद्गारे क्षमाऽसि ।

सरस्वती—न सरस्वती मयि रोषाय प्रभवति ।

कालिदासः—मानुष्येव भवती । किमागमनप्रयोजनम् ।

सरस्वती—भवत्सहवासलाभः । किमन्यत्सरस्वत्याः प्रियम् । स्वीकर्तव्येयं वन्दना ।

कालिदासः—सरस्वती मे जिह्वाग्रे नृत्यति । न पादयोः पतति ।

सरस्वती—(नूपुररवसहितं संचरन्ती) तदपि संभवेत् । कोऽविषयः कवेः ।

कालिदासः—अहो नूपुररवः ।

सरस्वतीनूपुरझङ्कृतिर्मे
विभर्ति काव्ये मधुरं निनादम् ।
न कालिदासप्रतिभाविलासो
व्रजेद्विकासं भुवने विनैनाम् ॥ १८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती—कथं नूपुरनादं कविप्रतिभाऽनुलग्ना ।

न कालिदासश्चरणस्थदासः
सरस्वतीकण्ठमणिः किलैषः ।
कुर्वीत यस्तामधरागतां स
कथं कविर्नूपुरदेशसक्तः ॥ १९ ॥

कालिदासः—सरस्वतीप्रभाव एषः ।

सरस्वतीजप्रतिभाप्रभावान्
निःस्तब्ध-संभ्रान्त-विनम्रदृष्टिः ।
अधोमुखोऽसावधरस्थकर्णो
वीक्षेत विश्वं शृणुयादनन्तम् ॥ २० ॥

सरस्वती—

अनन्तवागीशमनादिभाषा[1]
कथं भवन्तं कथयेत्किलैषा ।
अतीतवागान्तरहेतुरत्र
मूर्धानमेतं नमयेन्मदीयम् ॥ २१ ॥

कालिदासः—

नताननं तून्नमयेत्करोऽयं
तदीक्षितुं दृश्यमभूतपूर्वम् ।
इन्दीवरे द्वे उदिते पयोजा—
च्छ्रुताप्यदृष्टा[2] नु विधा विधातुः ॥ २२ ॥

सरस्वती—

नात्याहितं तत्; प्रतिभारविर्यत्
संयोजितः प्रीतिसुधांशुनाऽत्र ।
ततो द्युतिभ्रान्तदृशा विधात्रा
इन्दीवरे अब्जगते कृते ते ॥ २३ ॥

---

१ अनादिः अनारब्धा । मूकभाषा इति यावत् । हृदयभाषितं व्यज्यते ।

२ कमले कमलोत्पत्तिः श्रूयते न च दृश्यते ।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम् ॥—सुभाषितम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—

सौन्दर्यवह्यां वयसा नवायां
मतिप्रकर्षो वचसाऽऽविरस्ति ।
भावान्विता मां रसिका नु यासि
यथा पुरा मालविकाग्निमित्रम् ? ॥ २४ ॥

सरस्वती—नाहं मालविका नापि च भवानग्निमित्रः ।

श्राव्यं श्रुतं वेधि हृदां पदं ते
दृष्टं च दृश्यं भवतः प्रसादात् ।
धन्यास्मि कन्या विदिशाजनन्या
नान्योऽत्र मान्यो हि सरस्वतीशः ॥ २५ ॥

कालिदासः—विलीनः स्वप्न एषः । पुनश्च नवीभविष्यति नाट्यरूपेण मालविकाग्निमित्रे । देवि,

अहं नहीशो विनतोऽस्मि दासः
सरस्वतीव्याप्तमना जनानाम् ।
न वा महीशो न च सागरेशो
निरुद्धवागुज्जयिनीतनूजः ॥ २६ ॥

सरस्वती—ईश एव भवान् ।

शास्ता भवेद् यः पदशब्दसिन्धो-
र्वाणी यदीयोत्कटभावभूमिः ।
स नूनमीशो मनसःप्रकाशो
न देशबन्धोऽस्य न कालबन्धः ॥ २७ ॥

कालिदासः—(सहसा स्मृत्वैव) बन्ध एवायम् । कथं तु भवती बन्धगृहे प्रविष्टा ।

सरस्वती—भवद्रञ्जनार्थं प्रेषिताहम् । कापि सेवा स्वीक्रियताम् ।

कालिदासः—न सेवामीहे । इतो निर्गन्तुमर्हति भवती ।

सरस्वती—तत्किं कविराजो बन्धन एव दुःखाकुलः स्थातुमीहते ।

कालिदासः—किं वान्यत् तेन कार्यम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती—नेद दीनवचनं युज्यते सकलानन्दकारिणि कविश्रेष्ठे ।

कालिदासः—नात्र काव्येन कार्यम् ।

सरस्वती—तर्हि विदर्भेश्वरस्यानुज्ञां समधिगम्यालकादर्शनार्थं प्रतियातव्यम् ।

कालिदासः—अलका ? कामलकां जानासि ?

सरस्वती—भवत्पत्नीम् ।

कालिदासः—कथमेतत् ।

सरस्वती—सापि विदिशाकन्या शैशवे मत्प्रियसखी ज्यायसी भगिनीव ।

कालिदासः—कथं तद् भवती बन्धस्थानेऽत्र विदर्भेषु ।

सरस्वती—कोसलाधिपतेर्भयेन विदिशाधिपेन प्रेषिता तस्मै दासीभावेन । तेन विदर्भेशाय प्रेषिता । तेन च बन्धागारे प्रेषिता—भवदर्थे ।

कालिदासः—मैवम् । या सेवा मया वाञ्छिता न तां भवती विधातुं शक्नोति । निर्गच्छतु भवती ।

सरस्वती—सापि सेवा कदाचिन् मया साधिता भवेत् । कैषा ।

कालिदासः—मालवेशाय मत्सन्देशो देयः ।

सरस्वती—करिष्याम्येतत् ।

कालिदासः—चतुराङ्गने, न मया दुरुक्तमेतदवधि । न पुनर्मन्यस्व तव सत्यस्वरूपं न जानामीति । या स्त्री बन्धगृहमायाति, किमपि कर्तुं समर्थेति च जल्पति साऽवश्यं शत्रुनियुक्ता । तत्कथं मन्यसे मालवेशसन्देशं तवाधीनं करिष्यामीति । न सोऽद्यापि केनचिज् ज्ञातः । तद्गच्छतु भवती ।

सरस्वती—यद् भवतोच्यते न तत्र मे रोषः । सत्यमाह भवानहं शत्रुप्रयुक्तेति । तथापि भवत्साहाय्यदाने कृतनिश्चयाहम् । यत्तत्र मम जीवितस्य भविष्यति तद् भवतु । कथ्यतां कथमहं भवन्तं प्रत्याययामि । यत्किंचिदपि भवदुक्तं दिव्यमाचरितुं सज्जीभूतास्मि ।

कालिदासः—केन हेतुनायं त्यागो मत्साहाय्यदाने निर्बन्धश्च ।

सरस्वती—मम विदिशा कोसलेनाभिलषिता । तन्निवारणे कालिदासः प्रयुक्तोऽतस्तस्य सहायत्वेन मम मातृभूमिसेवा भवेत् । अपरं च शृणोतु भवान् । अलका मे प्रियसखी । शैशवे कदाचिदहं तया मृत्यो रक्षिता चर्मण्वत्याम् । सा सुखिनी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भवितुमर्हति । न मे कश्चित् पाशः । केवलं मातापितरौ । कन्यया विदिशार्थे जीवनं वितीर्णमिति श्रुत्वा तौ समाधास्यतः ।

कालिदासः—तथापि न तं सन्देशं कस्मायपि निवेदयितुं क्षमः । यद्यहमेवेतो गन्तुं शक्नुयां तदैव तत्कार्यसिद्धिर्भवेत् ।

सरस्वती—गच्छतु भवान् । अहमत्र तिष्ठामि ।

कालिदासः—नैतत्संभवति । रे रघुनाथ (सा चकितनेत्रमितस्ततः पश्यति ।) इत एहि ।

[रघुनाथः प्रविशति ।]

रघुनाथः—(तां वीक्ष्य विस्मयेन) कथमत्र भवती ।

कालिदासः—जानासीमाम् ?

सरस्वती—कथं वात्र भवान् ।

रघुनाथः—अयं मे ज्यायान् भ्राता । तस्य सहचारित्वेनात्रागतः । (कालिदासं प्रति) अद्यैव राजपथे दृष्टैषा ।

सरस्वती—न केवलं दृष्टा । नरपशुभ्यां रक्षितापि । कियन् मे भाग्यम् । कविराज, किमाज्ञापयति भवान् ।

कालिदासः—रघुनाथ, इयं प्रमदा मामितो मोक्तुं क्षमा । तत्कथं मन्यसे ।

रघुनाथः—तद्गच्छतु शीघ्रमार्यः । को विलम्बः ।

कालिदासः—यदि रक्षका मां निर्गतं जानीयुर्न तन्महदन्तरं गन्तुं शक्नुयाम् । अहमत्रैव तिष्ठामीति तेषां विश्वासः समुत्पाद्यः ।

रघुनाथः—किमत्र दुर्घटम् । भवद्वेषं धृत्वाऽहं तिष्ठाम्यत्र ।

सरस्वती—कियद्बन्धुप्रेम । कियच्च धैर्यम् ।

कालिदासः—कथं त्वामत्रोज्झित्वा यातुं प्रभवामि ।

रघुनाथः—भवानेव नित्यं मन्त्रयते देशकार्ये न निजदेहासक्तिः स्यादिति । तथा मामपि भवान् वदति नाम्ना रघुनाथ आचरणेन तु सौमित्र इति । तन्निःशङ्कं यातु भवान् ।

कालिदासः—कर्तव्यमेवमिदम् । दुष्करमपि कर्तव्यमेव । (कातरस्वरेण) अलका यदा तव कुशलं प्रक्ष्यति तदा मया किं वाच्यम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रघुनाथः—निजापत्यवत् तया मात्रा रक्षितः पालितोऽहम् । सा ज्ञास्यति मत्कृतिम् । मम सन्देशं च श्रावयतु तां भवान् । यद्भवतीचरणदर्शनार्थं सत्वरमागमिष्यामि । अन्तराये त्वयमेवापश्चिमः प्रणाम इति । शीघ्रं गच्छतु भवानधुना । प्रतिपलं महाभयमभियातीव ।

कालिदासः—तदागच्छ । देहि तव वेषम् । धारय चैतं मे । [उभौ निष्क्रान्तौ ।]

सरस्वती—महापुरुषावेतौ । नमस्कार्यौ । धन्योऽयं दिवसो ममायुषि ।

(आरबी, दादरा)

आहृता चारुता नयनयोरेषा नवचन्द्रिका ।
अवसिता तमसो निशा दीर्घा लोपितरघुनाथा ॥ धृ० ॥
तोषतुषारास्तारकाः पीडामेघा विरताः ।
शोभा हृदयाम्बरे गुरुतरा विमला महिता ॥
नाथ इतो मे चन्द्रमा उदिता सुषमा शान्ता ।
एता निचिताः प्रज्वालिता अगणिता दीपिकाः ॥ २८ ॥

कथं मम हृदयमत्र स्पन्दते सवेपथुः ।

[कालिदासवेषे रघुनाथस्तस्य वेषे कालिदासश्च प्रविशतः ।]

कालिदासः—कथं मया निर्गन्तव्यम् ।

सरस्वती—एषा विदर्भेश्वरमुद्रा । अनया सर्वं समीहितं लप्स्यते भवान् । [तस्मै मुद्रामर्पयति ।]

कालिदासः—का कथा भवत्याः ।

सरस्वती—मा तत्र चिन्ता भवतः ।

कालिदासः—वत्स रघुनाथ, न किंचित्साहसमनुष्ठातव्यम् । त्वां प्रतीक्षमाण एव दिवसान् कष्टं यापयेयम् । मा विस्मृतिस्ते भूयात् । देवि, तवोपकृतिरनिर्वाच्या । न लेशतोऽपि प्रत्युपकर्तुं क्षमोऽहम् । अतः क्षमामेव याचे ।

सरस्वती—विदिशासंकटनिवारणे यतितव्यमित्येव मे प्रार्थना ।

कालिदासः—गच्छामि पुनर्दर्शनाय ।

रघुनाथः—भवच्चरणरजो मस्तके धारयामि यशसे । [तथा करोति ।]

कालिदासः—चिरं जीव । [कालिदासो निष्क्रान्तः ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती—सरस्वती मन्नाम ।

रघुनाथः—उपकृतावावाम् । कुत्र गच्छति भवतीदानीम् ।

सरस्वती—मुद्राविवियोगान्नेतो गन्तुं क्षमा । अधुना भवतः सहवास एव मे गतिः ।

रघुनाथः—का भवती । कथं वा राजमुद्रालाभः ।

सरस्वती—नियुक्ताऽहं विदर्भेश्वरेण भवद्भ्रातरमनुनीय तस्य रहस्यभेदं कर्तुम् ।

रघुनाथः—तत्किमिदमाचरितम् ।

सरस्वती—यदद्य संभूतं तत्सुवर्णाक्षरैरेव लेखनीयं मम जीवनपटे । न जाने प्रत्यूषसि किं जम्बूको दृष्टः ।

रघुनाथः—किमेवं शुभं संवृत्तम् ।

सरस्वती—आसीदलकायाः प्रियसख्याः श्रुतं तद्देवरनाम । तया त्वहं तस्य वधूत्वेनापि संकल्पिता । मया तु न स दृष्टपूर्वोऽपि । अत उज्जयिनीं प्रस्थिता कुण्डिनपुरं दैववशात् समागता । तत्र दृष्टः स नयनविषयो रघुनाथः । तस्य भ्रातृदेवोऽपि दृष्टः श्रुतश्च ।

रघुनाथः—त्वमेव ननु सा सरस्वती यामार्याऽलका प्रतिदिनं प्रशंसति । पश्य सरस्वति, नाहं कविः । मया तु विदितं भवती नृत्यगानकाव्यकलाविशारदेति । तदेनमरसिकं मा वृणीष्व ।

सरस्वती—द्रक्ष्यावस्तत् । भवानभ्यन्तरे गत्वा निद्रामिषेण तिष्ठतु । अहमितो निर्गन्तुं प्रयतिष्ये । [रघुनाथो निष्क्रान्तः ।]

(भूपः झपतालः)

सौख्यदिनमेति मे सुफलिता कामना ।
तनुमनोमन्थना विगलिता यातना ॥ धृ० ॥
नाथदर्शनसुखे निष्ठिता वासना ।
अर्जिता याचना संहृता वञ्चना ॥ २९ ॥

[निष्क्रान्ता ।]

इति द्वितीयोऽङ्कः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

— ३ —

तृतीयोऽङ्कः ।

[उज्जयिन्यां नृपसभायाममात्य – सेनापति – पण्डितराजादिराज्यप्रमुखाः पारिषदा उपविष्टाः ।]

सेनापतिः – अमात्यराज, महाराजस्याज्ञामवेक्षमाणा सेना विदर्भानभिगन्तुं सज्जा स्थिता । न तु महाराजो विदर्भविमर्शमनुमन्यते ।

अमात्यराजः – सेनापते, जानामि भवतोऽधीरताम् । महाराजस्तु कंचिद् वृत्तान्तं सन्देशं वाऽवेक्षते । सेनायात्रार्थमाज्ञादानेन यत्परिणंस्यति तत् प्रजाहितार्थी देवः परिजिहीर्षति ।

सेनापतिः – न युद्धवर्जं राज्यं संभवति ।

अमात्यराजः – पण्डितराज, श्रुतं किंचिद् विदर्भगतात् कालिदासात् ।

पण्डितराजः – न हि, अमात्यराज । न किंचिदपि ज्ञायते ।

सेनापतिः – षण्मासाधिकः कालो निर्गतः । अथ वर्षाविप्लुतमार्गेण न सेनायात्रापि सुकराधुना ।

अमात्यराजः – विदर्भजनताऽस्मत्स्नेहं निःसंशयं बहु मन्येत । न सांपरायः प्रायः संभवेदेव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पण्डितराजः—अमात्यराज, न प्रजामतं युद्धविरामायालम् । निरङ्कुशा राजानः शासितारः । न तैर्युद्धं परिहार्यं मन्यते ।

नात्र प्रजाः समरदैवतपूजनाय
पर्युत्सुका अपि तु शासनतन्त्रविज्ञैः ।
क्रीडाङ्गणं जगदिदं निजरञ्जनार्थं
धात्रा विनिर्मितमिति प्रकटं मतं तैः ॥ १ ॥

सेनापतिः—कथमेवं मन्यते भवानवास्तविकम् ।

समरनिपुणता सा वाञ्छिता सर्वलोकै-
र्निजसुतनिवहांस्ते कुर्वते शस्त्रदक्षान् ।
किमिह किल नरेशाः कुर्युरेवंविधानां
युवकगणशतानां सैन्ययोगात्तदन्यत् ॥ २ ॥

पण्डितराजः—युवकैः सैन्यमेव निर्मातुं शक्यमिति युक्तमेव वचनं सेनापतिपदे विराजमानस्य । कुतः सेनायाः पतिः सेनां विना । न त्विदमपरिहार्यमिति जानातु भवान् । न सेनया प्रयोजनमित्युद्घोष्यताम् ।

सेनाकार्यं नास्ति तत्ख्यापनीयं
नैवं सैन्ये यान्तु वा ते युवानः ।
शस्त्राभ्यासं वर्जयित्वा तदैव
शास्त्राभ्यासे रंस्यते पुत्रवर्गः ॥ ३ ॥

सेनापतिः—वृथा श्रमयति वाणीं भवान् ।

अधीत्य शास्त्राणि भवन्तु शास्त्रिणो
न तैः स्वदेशस्य भवेत्सुरक्षणम् ।
न शास्त्रवाक्यैर्हि मुखोद्गतैरिह,
शरैस्तु कार्यं धनुरुद्गतैरिदम् ॥ ४ ॥

पण्डितराजः—क्षम्यमीदृशं वचनं सेनानायके । अपि जानाति भवान्—

जीवेद्धि राष्ट्रं भुवने विना सैन्यं बलाधिप ।
न राष्ट्रं राष्ट्रमेव स्यात् कलाशास्त्रनिधिं विना ॥ ५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अमात्यराजः—नात्र कलहो युक्तः । कथं नागतो महाराजः ।

[ततः प्रविशति कञ्चुकी ।]

कञ्चुकी—

भीष्मग्रीष्मकराहतां विकलितां यः सान्त्वयन् मेदिनीं
तत्रज्ञो विरचय्य ता उपनदीर्वापीस्तथा दीर्घिकाः ।
वर्षास्नातमहीं प्रसन्नमनसा सस्यावृतां लालयन्
सूर्यः सौम्यकरः प्रवेशित इतो राज्ञ्यान्वितो भूपतिः ॥ ६ ॥

[ततः प्रविशतो राजा राज्ञी च परिजनानुगतौ ।]

[उत्तिष्ठन्ति सर्वे । उपविष्टे राजनि तदाज्ञयोपविशन्ति ।]

राजा—अमात्यराज, किमद्य राज्यकार्यमुपस्थितम् ।

अमात्यराजः—कुन्तलेश्वरेण प्रेषिता दूताः । सार्वभौममवन्तीश्वरं प्रणम्य स निजसन्देशे विज्ञापयति । मानदेशाधिपेन सह कश्चित्सीमाकलहः समुद्भूतः । तद्यदि मालवनाथः कंचिदाधिकरणिकं पुरुषं राजनीतिकुशलं प्रेषयेत् तत्कलहशान्तिः सुलभा स्यादिति ।

राजा—किमन्यत् ।

अमात्यराजः—मालवप्रजा विज्ञापयति । महाराजेन वसन्तोत्सवः प्रतिषिद्धः । तदधुना शारदापूजनमनुज्ञायतामिति ।

राजा—सर्वमेतत्तिष्ठतु । का विदर्भवार्ता ?

अमात्यराजः—न ज्ञायते किंचित् ।

सेनापतिः—अहमेव भवदाज्ञया तत्र गन्तुमुत्सहे ससैन्यः ।

राजा—सेनापते, मालवप्रजा विदर्भजनता च न युद्धसमुत्सुकाः । अतो न सहसा युद्धं प्रवर्तनीयम् ।

हितं जनानां परराष्ट्रिकाणा-
मपि प्रियं नो, न च शङ्कितव्यम् ।
प्रजानुरागे नृपशासनं स्यात्
प्रजाविरागे तु कुतो नरेन्द्रः ॥ ७ ॥

अमात्यराज, ननु दूताः सन्देशहारिणो भवता प्रेषिताः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अमात्यराजः – महाराज, भवदाज्ञानुसारं कालिदासनिर्गमनान्तरं दैनिकसन्देशहरणं सुलभं स्यादिति प्रतिदिनं सैनिकदूतानामेको विभागः प्रेषितः ।

राजा – तत्कथं नाद्यापि सन्देशोपलब्धिः ।

अमात्यराजः – यद्यपि सुदूरो विदर्भदेशस्तथापि पक्षपूर्वमेव कालिदासप्रेषितेन दूतेनात्रागन्तव्यम् ।

[ततः प्रविशति द्वारपालः ।]

द्वारपालः – जयतु जयतु देवः । गोपालभट्टगोविन्दभट्टौ विदर्भेभ्य आगतौ महाराजदर्शनकाङ्क्षया द्वारि तिष्ठतः । अथ देवः प्रमाणम् ।

राज्ञी–पण्डितराजौ–आगतौ तौ ?

राजा – केन प्रेषितावेतौ ।

पण्डितराजः – यात्रार्थं गतौ । कदाचित्कमपि वृत्तान्तं जानन्तौ महाराजदर्शनमिच्छतः । प्रतीहारिन्, प्रवेशय तौ ।

(द्वारपालो निर्गच्छति । गोपालगोविन्दौ प्रविशतः ।)

गोपालगोविन्दौ – महाराजं वन्दे ।

राजा – कुत्र गतौ भवन्तौ । कदा प्रत्यागतौ । कां नु वार्तां कथयतः ।

गोपालः – देव, रामगिरियात्रार्थमितः प्रस्थितौ विदर्भराजधानीं कुण्डिनपुरं गतौ ।

वसुधा – ततस्ततः ?

गोविन्दः – तत्र राजाज्ञया तस्य संमुखं नीतौ ।

पण्डितराजः – विदर्भेशसंमुखं नीतौ ? ततस्ततः ?

गोपालः – तत्र कालिदासस्य कार्यस्य पृच्छा कृता विदर्भेश्वरेण ।

वसुधा – (त्वरया) तत्तु न भवद्भ्यां ज्ञातमेव । ततः किं पृष्टवान् स राजा ।

राजा – कालिदासकार्यसंबन्धि किमुक्तं भवद्भ्याम् ?

गोविन्दः – उक्तं यद्राजदूतोऽहमिति कालिदासः–

पण्डितराजः – तत्र गतस्तदेव सत्यं–

राजा – पण्डितराज, राज्यकार्यमिदम् । नात्र भवदुक्तेः प्रयोजनम् । तत्तूष्णीं भव । (गोविन्दं प्रति) तत्किमुक्तं भवद्भ्याम् ।

गोविन्दः – (वसुधां वीक्षमाणः)–मया न किंचिदुक्तम् । अयं गोपालः—

गोपालः – न मयोक्तं किमपि महाराज ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – भवतु । ततः किं संजातम् ।

गोपालः – श्रुतं कालिदासो बन्धगृहे निक्षिप्तः ।

राजा – वसुधा – बन्धगृहे ! नैतत् संभवति ।

अमात्यराजः – आभ्यां न सम्यक्श्रुतं भवेन्महाराज ।

राजा – सेनापते, नैतावता कार्यनिर्वाहः । विदर्भानभियातुं सेनाऽऽदिश्यताम् । अमात्यराज, सन्देष्टव्यं विदर्भनृपतेर्यन्न किंचिज् ज्ञातं, नापि च राजदूतः प्रतिनिवृत्त इति स्वयमेवागच्छामः । तत्कालिदासः प्रेष्यतां वृत्तान्तकथनायेति ।

सेनापतिः – यथाज्ञापयति महाराजः ।

अमात्यराजः – भवदाज्ञामनुतिष्ठामि ।

सेनापतिः – भोः, उद्घोष्यतां सेनाभिगमः ।

[नेपथ्ये रणभेरीनादः । उत्तिष्ठन्ति सर्वे ।]

राजा – (खड्गमाकृष्य) हर हर महाकाल! [निष्क्रान्तः ।]

[वसुधां पण्डितराजं गोपालं च वर्जयित्वा सर्वे राजानमनुसृत्य निष्क्रान्ताः ।]

वसुधा – गोपाल, गृहाणेमां कनकमालाम् । (कनकमालां स्वकण्ठादुद्धृत्य तस्य हस्ते समर्पयति ।) सम्यगनुष्ठितं कार्यं कालिदासविषये ।

[स मालां गृहीत्वा प्रणमति ।]

गोपालः – अनुगृहीतोऽस्मि ।

[मालां सस्पृहं वीक्षमाणो निष्क्रान्तः । पण्डितराजस्तमनुसरति ।]

वसुधा – कालिदासस्य पुनरुज्जयिनीप्रवेशं नानुज्ञास्यामि । तेन विना महाराजः सम्यङ्नियन्त्रित इदानीम् । विमना अपि देवः कालान्तरेण निःसंशयं कृतां सेवामभिमन्येत । युद्धयात्रायां तु कदाचिन् मोचितः कालिदासो न पुनः कवित्वेन विलसेदिति किमपि करणीयम् । संसारे पत्नीयमनुस्वरन्ती वीणैव ।

(देस–एका)

वनिता विहिता पतिशरणा संसारवीणा ।
सरणीगीतिनिपुणा । सहवादिगतिधुरीणा ।
विविधान्दोलनरसविवरणरममाणा ॥ धृ० ॥

रमणमनोगतिभेदाः
परिणामे ते मूर्च्छनास्वरविवादाः
सहकम्पलये हृदयविदीर्णा ॥ ८ ॥ [निष्क्रान्ता ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति वहिःप्रासादं गोपालमनुगच्छन् पण्डितराजः ।]

पण्डितराजः—गोपाल, तां कनकमालां मे समर्पय ।

गोपालः—का माला पण्डितराज ?

पण्डितराजः—या देव्या प्रदत्ता ।

गोपालः—सा प्रनष्टा ।

पण्डितराजः—विरमाविनयात् । देव्या दत्तां मालां मे प्रदेहि ।

गोपालः—सा माला ? सा तु देव्या मे प्रदत्ता । कथं तस्या अनुज्ञां विना दातुं समर्थः ।

पण्डितराजः—मम साहाय्येनैव सा मालाऽर्जिता भवता ।

गोपालः—मैवं पण्डितराज । कथं विस्मृतम् । अहं विदर्भान् गतः । अहं विदर्भराज-सैनिकैस्ताडितः । अहं कालिदासवृत्तान्तं विदर्भेशाय निवेदितवान् । मार्गसंकटानि मया निरस्तानि । शुभवृत्तान्तं देव्यायहं कथितवान् । कथं तत्ते साहाय्येन समर्जिता माला ?

[गोविन्दः प्रविशति ।]

गोविन्दः—पण्डितराज, मां गृहं प्रेषित्वा धनं देव्या गोपालाय समर्पयसि । किमेतत् ।

पण्डितराजः—गोविन्द, समय आगतोऽसि । देव्या प्रदत्तां कनकमालामयं गोपालो न ते प्रदत्ते । तवैव कृतेऽहं तेन सार्धं प्रस्थितः ।

गोविन्दः—गोपाल, दर्शय तां कनकमालाम् । (गोपालस्तां दर्शयति ।) कथमस्या अधिगमः ।

गोपालः—पण्डितराजोऽयं परोपकारी । मत्कर्तव्यदक्षतया प्रीतोऽसौ । ततो देव्यै मयानुष्ठितां सेवां निरूप्य तयेदं पूर्णपात्रं मे समर्पितवान् ।

गोविन्दः—गोपाल, किमेतन्महत्कार्यं त्वया साधितम् ?

गोपालः—कथं न जानासि । त्वं सर्वत्र मया सार्धमासीः ।

गोविन्दः—न जाने किं वदसि । न मया ज्ञातं त्वया महत्कार्यं कृतं क्रियमाणं वा ।

गोपालः—मैवं वद । पण्डितराजस्त्वयि कुप्येत् । स मन्येत त्वं विदर्भान् नैव गतो यतो न जानासि त्वं यन्मया विहितम् । मैवमसत्यं मन्यस्व । त्वं मया सार्धं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

विदर्भान् गतः। मम महाकर्म त्वया साक्षात्कृतम्। अपि मद्दानलाभात् त्वं प्रीतः। सर्वमेतदस्मै पण्डितराजाय निवेदय।

पण्डितराजः—गोविन्द, तवैव कृते तां कनकमालामहं याचितवान्। शठस्त्वयं गोपालः।

गोविन्दः—(बाहुयुद्धसज्जतां प्रदर्शयन्) गोपाल, देहि कनकमालाम्।

गोपालः—स्वपरिश्रमार्जितेयं मे माला।

गोविन्दः—तत्किमर्जितं मया।

गोपालः—सुबहु किल। पश्य। प्रथमं तावद् देशाटनम्। ततश्च चातुर्यम्। तथा मत्सैनिकवेषात् संरक्षणम्। ततश्च दीर्घायुर्लाभः। तथा च मम सौहृदम्। ततश्च विदर्भनृपदर्शनम्।

गोविन्दः—एतत्सर्वं यथा त्वया लब्धं तथैव मया।

गोपालः—एवमेव।

गोविन्दः—अतः कनकमालापि यथा तव, तथैव ममापि भवितुमर्हति।

गोपालः—न हि रे मूढ। पूर्वं सर्वं मया सार्धं त्वयाऽधिगतं यतो मम संगतौ त्वं स्थितः। कनकमालालाभे त्वहमेककः। न तत्र ते संगतिरासीत्।

गोविन्दः—वञ्चना मे त्वत्कृता त्वियमेव।

गोपालः—पश्येदम्। त्वया सार्धं मया सर्वसंकटानि पारितानि। सत्यमेतत्।

गोविन्दः—सत्यम्।

गोपालः—यदा तु न त्वं मया सहासीस्तदा कनकमाला मया लब्धा। अतस्त्व प्रभावाद् दुःखार्जनं मम प्रभावाद् धनमित्येव सिद्धम्। तत्कथं कनकमालां याचसे।

पण्डितराजः—कनकमाला तु मत्सहवासे लब्धा।

गोपालः—न हि न हि पण्डितराज। तल्लाभो मम भाग्यवशात्। अपरं च पश्य गोविन्द। त्वं ग्रहगणितज्ञः। सत्यम्?

गोविन्दः—सत्यम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः – फलज्योतिषज्ञः ?

गोविन्दः – एवमेव ।

गोपालः – हस्तसामुद्रिकः ?

गोविन्दः – अथ किम् ।

गोपालः – (हस्तं तत्पुरः प्रसार्य) तत्पश्यतु भवान् कथं मे मालालाभो न तव ।

गोविन्दः – नैतद् हस्तगतम् ।

गोपालः – तर्हि मुखोद्गतं स्यात् ।

गोविन्दः – मा शब्दच्छलं कुरु । अधुना तां मालां हस्तगतां करिष्यामि ।

[तमभिधावति । मदनिका प्रविशति ।]

गोपालः – (तस्याः पश्चात् स्थित्वा) न स्त्रीसंनिधावविनयो युक्तो गोविन्द ।

गोविन्दः – देहि तर्हि तां मालाम् ।

गोपालः – मदनिके, त्वत्कृते या माला महता शौर्येण मया समर्जिता तामयं चोरयितुमिच्छति ।

मदनिका – कैषा माला ।

गोपालः – (मालां तस्यै दर्शयित्वा) एषा सा ।

मदनिका – मत्कृते ?

गोपालः – अथ किम् । नाहं तां कण्ठे धारयेयम् ।

मदनिका – कथं लब्धा ।

गोपालः – महत्कार्यं संपाद्यार्जिता, न लब्धा ।

मदनिका – कथं मम कृते ? वञ्चयसि माम् ।

गोपालः – न हि न हि मदनिके । पश्य । असौ माला मदीया । अहं त्वदीयः । अतो मालापि त्वदीया ।

मदनिका – देहि तां मे ।

गोपालः – नैवम् । यद्यहं त्वदीयो नाद्यापि भवती मदीयेति संमतं ते ।

मदनिका – स्यादेवम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोपालः—कदा ।

मदनिका—यदा देव्यलका मां परिणेतुमनुजानाति । अहं तस्या हस्ते न्यासीकृता ।

गोपालः—केन ।

मदनिका—मम भगिन्या ।

गोपालः—कैषा भगिनी । कुत्र वर्तते सा ।

मदनिका—विदिशायां सरस्वतीनाम्नी ।

गोपालः—भवतु तत् । कुत्र नु भवती प्रस्थिता ।

मदनिका—श्रुतं देव्याऽलकया भवान् विदर्भेभ्यः प्रत्यागत इति । अतस्तयाहमादिष्टा । हञ्जे मदनिके, गच्छ । गोपालभट्टमानय । स कालिदासवृत्तान्तं जानीयादिति ।

गोपालः—नाहं जाने ।

मदनिका—तथापि देवीमलकां द्रष्टुं गच्छावः ।

गोपालः—बाढम् । न किंचिज्जानामीति वदिष्यामि । [निष्क्रान्तौ ।]

पण्डितराजः—गोविन्द, गता कनकमाला, निर्गता मदनिका च । त्वं प्रावृष्यपि निर्जलः ।

गोविन्दः—नैतत्सहिष्ये ।

पण्डितराजः—किं करिष्यसे ।

गोविन्दः—तस्या मालाया अर्धांशं लप्स्ये ।

पण्डितराजः—कथमिव ।

गोविन्दः—महाराजमन्यायनिवारणार्थं प्रार्थयिष्ये ।

पण्डितराजः—नैतेन कार्यनिर्वाहः । शठं प्रति शाठ्यमेव प्रयोज्यम् ।

गोविन्दः—उपदिशतु भवान् । नैतमवमानं सहे ।

पण्डितराजः—अद्य रात्रौ कालिदासगृहं गन्तव्यम् ।

गोविन्दः—किं ततः ।

पण्डितराजः—तत्र तस्य गृहात् सा मदनिकाप्राप्ता कनकमाला तया सार्धं च कालिदासग्रन्थधनं चोरयितव्यम् ।

गोविन्दः—ग्रन्थधनेन किम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पण्डितराजः—रक्षामः कुत्रचित् सुरक्षितम् । अधुना युद्धं भावि । अतो न तत् तस्य गृहे सुस्थितं स्यात् ।

गोविन्दः—तत्किमपहरणेन । प्रकाशमेव तन्नेयम् ।

पण्डितराजः—न कालिदासपत्नी तस्यापनयनं मन्येत । कालिदासवृत्तान्तोऽपि न तस्यै कथनीयः ।

गोविन्दः—साधु । एवमेव करिष्यामि । [निष्क्रान्तः ।]

पण्डितराजः—न मे प्रतिवीरभयमिदानीम् ।

(विहागः—त्रितालः)

सा मधुरा नाम वार्ता
पुनः पुनर्या श्रोतुमीहिता ॥ धृ० ॥
कालिदासभा राहुमुखमिता
ममैवाधुना धीः प्रकाशिता ॥ ९ ॥ [निष्क्रान्तः ।]

(ततः प्रविशति कालिदासगृहेऽलका । समीपे मदनिका । रात्रिसमयः ।)

अलका—मदनिके, पुनरप्यदृष्टनाथेयमपरा निशा ।

मदनिका—यास्यन्त्येता यामिन्यः । उदेष्यति च ते नाथः ।

अलका—(सकरुणं) कदैतत्सम्भवति । मदनिके ।

(सारङ्गः—केरवा)

नयने मम नूनमधीरे ॥ धृ० ॥
नलिने हि यथा विलसत्यरुणे
प्रियकरवाञ्छितसंगमने ॥ १० ॥

मनसा चिन्तितं न वैरिणापि चिन्त्यत इति सत्या जनोक्तिः ।

मदनिका—आगमिष्यति देवि भर्ता । एवं शोकाकुला मा भूः । अधुना विश्राम्यतु भवती ।

अलका—कुत्र विश्रमः । निमीलिते नेत्रे नाथमूर्तिरेव दृश्यते ।

मदनिका—तथापि दीपं निर्वाप्य शयनमलंकर्तुमर्हसि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका—न स गोपालभट्टोऽपि किंचन जानीते ।

मदनिका—महाराजाय निवेद्य श्वो दूतविशेषं प्रेषयामः ।

अलका—अपि च युद्धं प्रसक्तमिति श्रूयते ।

मदनिका—न युद्धं प्रसक्तम् । विदर्भेशमीलनाय युद्धनिवारणाय च महाराजो विदर्भानभिगतः ससैन्यः ।

अलका—भवतु । आगतो दिवसो यापनीयः । निर्वापय दीपम् ।

[तथा कृत्वाऽन्तर्गत्वा स्वपितः ।]

[ततः प्रविशति कृष्णप्रावरणावृतो गोविन्दभट्टः ।]

गोविन्दः—सर्वं शान्तमिति भयावहं भासते । (परिक्रम्य) कथं खलु गृहान्तःप्रवेश स्यात् । कुत्र वा ग्रन्थधनं भविष्यति । (परिक्रम्य विमृश्य च) ग्रन्थास्तु प्रवेशमन्दिर एव स्युः । गृहवासिनस्तु पश्चाद्भागे भविष्यन्ति । (भयं नाटयित्वा) रे गोविन्दभट्ट, किमिदं साहसं कर्तुं प्रवृत्तोऽसि । याभ्यां हस्ताभ्यां दर्भाः कल्पयितव्यास्ताभ्यां चौर्यकर्म करोषि । येन मुखेन वेदमन्त्रा उद्घोषयितव्यास्तेनैव चौर्यकर्मप्रशस्तिं पठसि । ननु विपरीतप्रियं हि दैवम् । किं तु ननु विपरीतमपि । विद्या चोरयितव्या । परशुरामात् किल कर्णेन धनुर्विद्या चौर्यकर्मणैव लब्धेति श्रूयते । तन्मयापि तदनुकारिणा न किमपि विलक्षणं विरुद्धं वा क्रियते । (श्रुत्वेव) सर्वं श्मशानवत् शान्तं प्रतिभाति । भवतु । कार्यं सत्वरं समाप्य गृहं गत्वा स्वपिमि । (द्वारं हस्तेनोद्घाटयितुं प्रयतते ।) किमिमे जना द्वाराणि पिदधति । भवतु । परितो गत्वा प्रवेशस्थानं मार्गयिष्ये । (श्रुत्वा) आः, कोऽपि विघ्नकार्यागच्छति । तदन्तर्हितस्तिष्ठामि । [निष्क्रान्तः ।]

[अन्यतः प्रविशति सुवेषधारी गोपालभट्टः ।]

गोपालः—मद्विदर्भाभिगमनशौर्यं श्रुत्वा मदनिका परं संतुष्टा । अपि कनकमालासमर्पणेन मदधीना भवेत् । तया दत्तसंकेतः कालोऽयम् । सर्वं शून्यमिव दृश्यते । तत् संकेतध्वनिं करोमि । (तथा करोति ।)

मदनिका—(प्रविश्य) मा कोलाहलं कुरुष्व । मन्दं वद ।

गोपालः—किं प्रयोजनं वचनेन त्वय्यवतीर्णायाम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनिका—न त्वं नियम्यः । अन्यत्र कुत्रचिद्गत्वा कनकमालां परिदधामि ।

गोपालः—एहि । उपवनं गच्छावः ।

मदनिका—माऽविनयमाचर ।

गोपालः—विनीतोऽहं तव पादयोः कथमविनीतो भवेयम् । एहि । [निष्क्रान्तौ ।]

[ततः पुनः प्रविशति गोविन्दः ।]

गोविन्दः—कथं मदनिकया सार्धं गतो गोपालः । कनकमालापि नीता । तत्रैव मया गन्तव्यम् । किं त्विदं चौर्यकर्म प्रथमं निर्वर्तनीयम् । एतत्तु सम्यग्जातं यन्मदनिकया द्वारमुद्घाटितम् ।

[कृष्णवस्त्रं प्रावृत्य द्वारमभिगच्छति ।]

[ततः प्रविशति सैनिकवेषं धारयन् कालिदासः ।]

कालिदासः—कोऽयं चौरः । प्रोषिते मयीयं दशा मे गृहस्य ।

[तमभिगम्य तं ग्रीवायां गृह्णाति ।]

गोविन्दः—(सभयं) पिशाचः । पिशाचः । भो जनाः, मोक्तव्योऽयं जनः ।

[ततः प्रविशति ससंभ्रममलका ।]

अलका—किमत्र वर्तते । कौ भवन्तौ ।

कालिदासः—(भिन्नस्वरेण) नगररक्षकोऽहम् । स्तेनोऽयं गृहीतो भवद्गृहप्रविष्टः । नयामि तं बन्धागारम् ।

गोविन्दः—(पादयोः पतित्वा) मैवम् । वेदपाठको द्विजोऽहम् । पण्डितराजाज्ञया कालिदासग्रन्थधनचौर्ये प्रवृत्तः । क्षम्यतामेतत् । न पुनरेवं करिष्यामि ।

अलका—(सविस्मयं) गोविन्दभट्ट एषः । किं कृतं रे मूर्ख । गम्यताम् ।

[गोविन्दो गन्तुं प्रस्थितः, कालिदासेन पुनर्गृहीतः ।]

कालिदासः—नैवं पलायनं युज्यते । बन्धागारं गन्तव्यं त्वया ।

अलका—मैवं रक्षक । गच्छत्वयं वराकः ।

कालिदासः—गृहीतः प्रणय एषः । गच्छ रे मूर्ख । [निष्क्रान्तो गोविन्दः ।]

अलका—भवानपि श्रान्तो गन्तुमर्हति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—श्रान्तस्य विश्रान्तिरभिमता । न मे निर्गमने स्पृहा । अत्रैव तिष्ठामि । न वा पुनरन्योऽपि दुर्जन आगच्छेदित्यत्रैव स्थानं युक्तम् ।

अलका—यद् भवते रोचते । निद्रार्थिनी त्वहं गच्छामि । यदि किंचिदिष्टं तन्मम सखी मदनिका दास्यति । मदनिके ।

कालिदासः—न सखी संनिहितेति मन्ये ।

अलका—(ससाध्वसं) कुत्र गता सा वराकी । घोरनिद्राधीना ननु । अहं त्वेकाकिनी किलात्र ।

कालिदासः—कथमेकाकिनी । मया सद्वितीया भवती । कुत्र वर्तते गृहस्वामी ।

अलका—गतोऽसौ दूरदेशम् ।

कालिदासः—कथं भवतीमेवंविधां विहाय गतोऽयमरसिकः ।

अलका—कथमाह भवानेवंविधामिति ।

कालिदासः—कथं न जानाति भवती ।

(पहाडी—एक्का)

अलकाम्बुदराजिरिता । वदनचन्द्रबिम्बनता ।
अदयवेधिहृदयभेदिचपला ननु नयनधृता ॥ ध्रु० ॥
देहगता दाहकता विरहानलसंगुणिता ।
स्फुरदधरा युवतिवरा स्वर्गधराधिकविहिता ॥ ११ ॥

अत एव ब्रवीमि । कथं तेन विहीना भवती विरहव्याकुला ।

अलका—(स्वगतं) ननु भर्ता खल्वेषः । मां प्रतारयितुमीहते । भवतु । एवं करोमि । (प्रकाशं) विरमास्माद्विप्रलापात् । व्यर्थं स गोविन्दभट्टो निष्कासितः । सहायत्वे क्वचिदुपयुक्तोऽभविष्यत् ।

कालिदासः—न भवतीपरित्राणे मत्तोऽन्यः समर्थः स्यात् । दैवादेवेदं समानीतम् । तत्कुतो नियतिविरुद्धाचारः । न भेतव्यम् । सर्वपीडानिवारणे ते प्रभवेदयं जनः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मा स्म भवती गृहं प्रविशतु । यतो ममापि भवत्या रक्षणार्थेऽन्तःप्रवेशोऽपरिहार्यः स्यात् ।

अलका—नगररक्षको भूत्वा न जानासीदं कालिदासगृहमिति । विपरीतं च वर्तसे ।

कालिदासः—स कालिदासो विदर्भेश्वरेण बन्धागारे निक्षिप्य पीडयित्वा—

अलका—किं ब्रवीषि । कथं जानाति भवान् ।

कालिदासः—भवतु । नामङ्गलमुच्चरिष्यामि ।

अलका—हर हर ! किंविधं दैवदुर्विलसितम् । दुर्भागधेये अलके, न ते सान्त्वनमिह जगति । हन्त पतामि । (मूर्च्छां नाटयति ।)

कालिदासः—(ससंभ्रमं तामुद्धृत्य) प्रिये अलके, दासोऽयं कालिदास एव ।

अलका—(नेत्रे उन्मील्य) ननु स्वप्न एषः । मधुरश्च । (नेत्रे निमील्य तं समाश्लिष्यति ।)

कालिदासः—अयि मुग्धे नैष स्वप्नः । (साऽऽत्मानं धारयति ।)

प्रणयिहृदया यूयं बाला अकारणकातराः
प्रतिपवनतो व्याधूतास्ता लता विटपाश्रिताः ।
मनसि च पुनस्तासां वज्रं विशेद् दुरितोद्गमे
विधिरपि न वा प्रायो विद्यादिदं ललनामनः ॥ १२ ॥

अलका—कथं च वा विधिर्विद्यात् प्रतारकपुरुषपराक्रमम् । भवतु कथमकस्माद् भवानत्रागतः ।

कालिदासः—पलायनेन ।

अलका—कुतः ।

कालिदासः—विदर्भेभ्यः ।

अलका—अपि जानातीदं महाराजः ।

कालिदासः—न हि न हि । प्रथममिहैवागतः । अथ भविष्यति प्रभाते भूपदर्शनम् ।

अलका—अपि कुशलोऽसि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—तव दर्शनेन । भवतु । किमेतेन । पश्येमां शरद्रजनीं प्रिये ।

(दरबारी कानडा-त्रितालः ।)

शरदि यामिनी कान्तकामिनी
धवलचन्द्रिकावसनधारिणी ॥ धृ० ॥
निर्मेघनभोमेचकालका
विमलतारकाकुसुमभूषिता ।
विकचकुमुदिनीप्रीतिपताका
उपयाति पतिं निशा विरहिणी ॥ १३ ॥

अलका—(तस्य हस्तौ गृहीत्वा) न नभोगतश्चन्द्रमास्तथा मे प्रियो यथाऽयं पुरस्थितः पुनरुदितो वर्षाव्यपगमे ।

(भीमपलासी-त्रितालः)

किं कुरुतां सा हिमशशिना
रमणी मनसा हृतधृतिना ॥ धृ० ॥
शरदि शीतला राकारजनी
विरहवतीं न तु मधुरा धरणी
आतुरे स्थिते नयने जलिनी
मोहघना या हतललना ॥ १४ ॥

नात्र नभःशायी शशी व्यथापनोदः ।

कालिदासः—कृशा दृश्यसे । विरहिण्या रात्रिर्निर्घृणैव । अपि तु दिवसो विविध-व्यापारैः सह्यः स्यात् । निद्रया विना तु त्रियामा रात्रिः कथं सह्या ।

अलका—कथं कठिनहृदयेन त्वया ज्ञायेत विरहिण्या जायाया जीवनम् ।

(मांड-त्रितालः)

न चैषा कान्ता तं वियोगं सहते ॥
जगति न रमणी नाथविरहिणी विजनवने रमते ॥
प्रीत्या निभृता भीत्या न धृता तनुविलये त्वरते ॥
वाञ्छा नच भोजने । नेत्रतो वारि शयने ।
निरता प्रिये स्मरणे । संसरणे नोत्सहते ॥ १५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—सत्यमेवं प्रिये । अपि तु संगमने विस्मरिष्यावः सर्वदुःखम् ।

अलका—दुःखम् ? कुतो भवतो दुःखम् ?

प्रेमपाशैर्निबद्धाहं कृता दासी त्वया किल ।
विस्मृता दूरदेशेषु सर्वथा ननु वञ्चिता ॥ १६ ॥

कालिदासः—विस्मृता ? वञ्चिता ? व्यर्थं दोषारोपोऽयमस्मिन् जने ।

(कर्नाटकी—दादरा)

क्षणमपि मे त्वं विगता । मनसो न च कान्ता ॥ धृ० ॥
वनहरिणास्तव नयनं स्मारयन्ति तेऽनुदिनम् ।
करिकरभास्तव गमनं तनुलतिकां मृदुललताः ॥
भ्रमरकुलं कचनिचयं कमलगणो वदनमिदम् ।
स्मारयन्ति करचरणं तरवो नवपल्लविताः ॥ १७ ॥

भवतु तत् । किञ्चिदानन्दकरं वृत्तं शृणुष्व ।

अलका—किमेतत् ।

कालिदासः—मया बन्धनान्मुक्तिर्लब्धा कस्याश्चिल्ललनायाः ।

अलका—केनोपदिष्टस्तस्या बन्धने निपतितुम् ।

कालिदासः—न हि मुग्धे । सुकीर्तिकृतबन्धनात् ।

अलका—या सुकीर्तिकृतबन्धनान्मोचयित्वा दुष्कीर्तिं भवन्तं प्रहिणोति केयं ललना । कथं वाऽऽनन्दकरं वृत्तम् ।

कालिदासः—अयि मानिनि, विदर्भेशः सुकीर्तिः । तस्य बन्धनान्मोचितः । नाहं कथयाम्येव ।

अलका—कथं ललनातो मोक्षः संभवेत् । केयं वा ।

कालिदासः—भवत्सखी ।

अलका—कैषा । सपत्नी कविता भवेत् ।

कालिदासः—तया तु बन्धने निक्षेपितः । न विदर्भेशस्य सा बहुमता ।

अलका—तत्कथयतु भवान् केयं मम सखी भवन्तं बन्धमुक्तं द्रष्टुमधीरा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—नैव कथयेय यतो नानन्दकरं वाक्यमिदं ते भवेत् ।

अलका—मैवम् । यद् भवदानन्दकरं तन्ममापि भवितुमर्हति । तत्प्रार्थये नाथ केयमिति कथयितव्यम् । न जाने कामपि सखीं विदर्भस्थायिनीम् ।

कालिदासः—विदिशाकन्यकेयं सरस्वती ।

अलका—अम्मो । सत्यमेतत् । कथं सा तत्रोद्भूता कथं वा भवन्मोक्षे प्रभूता ।

कालिदासः—तत्कथानकं यथाकालं श्रोष्यसि । मया कथनीयं त्वन्यदेव ।

अलका—किं तत् ।

कालिदासः—विदर्भेषु सरस्वतीं दृष्ट्वा मालविकाग्निमित्रं नाम नाटकं मया संकल्पितम् । सरस्वती किल मालविका । अत एव नृत्यकलादिनिपुणा विदर्भावतीर्णा कल्पितैषा मालविका ।

अलका—(साकूतं) आम् । भवतु तत् । कुत्र सेदानीं गता ।

कालिदासः—रघुनाथेन सह तां बन्धनागारे दैवाधीनां कृत्वाहं निर्गतः । न जाने किं ततः परम् । तयोर्मुक्तये प्रयत्नः कर्तव्यः । महाराजाय सर्वं कथयिष्यामि ।

अलका—मालवसेना तु विदर्भानभियाता । तथा च रघुनाथहस्ते सुरक्षिता सरस्वती ।

कालिदासः—न समरः प्रसज्येतेति मन्ये । भवतु । गच्छावो विश्रमाय ।

अलका—सम्यगुपालब्धास्मि । आनन्दसमये तव श्रमापनोदं विस्मृतवती ।

कालिदासः—कुतस्त्वद्दर्शने श्रान्तिः ।

रामालोके समुद्भूते हृदयाह्लाददायिनि ।
श्रमदूषणवार्तापि कुतः संपद्यते पुनः ॥ १८ ॥

अलका—तथापि भवत्सेवैव मेऽभिमता ।

(यमनः—त्रितालः)

रमणीप्रिया पतिसेवा
वृणुतेऽपरं नात्र जाया ॥ धृ० ॥
स्नेहसरिदियं वहति सर्वदा
हृता सर्वथा तृषा तापदा
तीरतरुकृता मे सुखदा । छाया ॥ १९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—अग्रतो गच्छतु भवती । प्राङ्गणकपाटं पिधायानुसरामि ।

अलका—एवमेव । [निष्क्रान्ता ।]

कालिदासः—भाग्यं मे महदिदम् ।

(काफी—त्रितालः)

मम विमला ननु बाला
पतिहितनिरता करुणकोमला ॥
सौख्ये हि सखी मौक्तिकमाला
विरहे तमसा नलिनी विकला
प्रीतिसङ्गमे तरङ्गतरला ॥ २० ॥

[निष्क्रान्ताः ।]

इति तृतीयोऽङ्कः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha



गोपालभट्टः
(श्री॰ रंगनाथ देवधर)

गोविन्दभट्टः
(श्री॰ प्रभाकर गोखले)

मदनिका
(कु॰ तारा आठवले)

[१९-११-१९६१]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

— ४ —

॥ अथ चतुर्थोऽङ्कः ॥

(कालिदाससदने मदनिका-दोहदोत्सवः । मदनिका दोलासीना । सरस्वती पुष्पमाला-ग्रथनव्यापृता । अलका चन्दनोद्धर्षणं समापयति ।)

अलका —

मेघमवेक्षते । चातकमालिका ।
इयं मदनिका । पुत्रार्थिनी ॥ १ ॥

सरस्वती —

चकोरवाञ्छिता । उदेति चन्द्रिका ॥
इयं मदनिका । विदिशायाः ॥ २ ॥

अलका —

चक्रवाकी भर्त्रा । दलेन वियुक्ता ।
इयं मदनिका । उज्जयिन्याम् ॥ ३ ॥

सरस्वति, एहि । अत्रोपविश । [सा मदनिकासमीपमुपविशति । अलका दुष्टदृष्टि-निवारणविधिं विदधाति ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनिका—ननु देवि । अपि ज्ञातं कदा कुन्तलेभ्य आर्यकालिदासः प्रतिनिवर्तत इति ।

सरस्वती—अयि, ऋजुतया प्रष्टव्यं कदा श्रीगोपालभट्ट आगमिष्यतीति ।

मदनिका—(सत्रपं) भैवम् ।

सरस्वती—मा भैषीः । यद्यार्यः कालिदासः कुन्तलेष्वेव निवसेत् तथापि गोपालभट्टो भाविपुत्रमुखदर्शनार्थं सत्वरं प्रत्यागमिष्यति ।

मदनिका—नार्यरघुनाथ आर्यकालिदासेन सह कुन्तलेभ्यो गत इति मा गर्वं करोतु भवती । मे भर्ता कविराजप्रिय एव ।

अलका—पूर्वानुभवं स्मृत्वा रघुनाथोऽत्रैव रक्षणाय निहितस्तत्रभवता ।

मदनिका—आर्यकालिदासस्य विदर्भगमने महान् व्यतिकर एव संजातः । वर्ष-द्वयं निर्गतं तथापि सा घटना प्रत्यग्रेव प्रतिभाति । न केवलमार्यकालिदासस्य, अपि त्वितरेषां जीवितमपि संशयापन्नमासीत् ।

सरस्वती—पङ्कोऽपि पद्मप्रभवः । अमङ्गलादपि कुशलं कदाचित् संभवति तथा तस्मादेव संशयापातान् मे कविराजदर्शनं, तेन नाटकलेखनं, ममोज्जयिन्यामागमनं, आर्यस्य दर्शनं, नाटकप्रयोगे ममाभिनयश्चेत्यादि सर्वं समापन्नम् । (अलकां प्रति) तदैव मयेयं यवीयसी स्वसा न्यासीकृतासीद् भवतीहस्ते ।

मदनिका—कविराजश्च राजकविर्जातः ।

सरस्वती—तस्य मेघदूतमेव तत्रालम् । कथं मन्यते भवती ।

अलका—राज्यकार्यनियुक्तः कविरिति प्रख्यातः किल ।

सरस्वती—अथ किम् । राज्यकार्यं वर्तमानकालीनं विस्मर्यते सत्वरमेव । भाविकालः कालिदासं कवित्वेनैव जानीयात् ।

अलका—अपि तु पण्डिता मत्सरग्रस्ताः । राजकृपादृष्टिविषयमन्ये नृपसभासदो न सहन्ते । नेदं जीवनं सुखावहम् ।

सरस्वती—गौरवं पीडयान्वितम् । पीडा तु नश्यति गौरवं च चिरं तिष्ठति । उज्जयिनी भविष्यत्कालेऽपि कालिदासकविनोज्जयिनी स्यात् ।

अलका—(दक्षिणाक्षिस्पन्दनं सूचयित्वा) भवतु तत् । अधुना तु केवलं कुन्तलराज्यात् सुखं प्रत्यागमनं वाञ्छितम् ।

मदनिका—राजरक्षकै रक्षितस्य कुतो भीतिः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

सरस्वती – गोपालभट्टेन च।

मदनिका – मा मामुपहसतु भवती। सोऽप्यार्यकालिदासे स्निह्यति। तस्य संरक्षणे च न जीवितमपि गणयेत्।

अलका – भवद्विवाहमङ्गलमपि यदा लोकप्रथितं भवेत्तदा तस्मिन्विषयेऽपि सकलो लौकिक-व्यवहारः स्यात्।

सरस्वती – रहस्यप्रियाऽहम्।

अलका – न मे तु तद्रोचते। विशेषत ईदृश्यां तेऽवस्थायाम्।

मदनिका – न ममापि। न परिहासं प्रत्यर्पयितुं समर्थाऽहम्।

[निपुणिका राज्ञीप्रेषितमुपायनं गृहीत्वा प्रविशति।]

निपुणिका – मदनिके।

[मदनिका त्वरया तामभिगम्य परिष्वजते।]

मदनिका – नाहमधुना प्रासादं गच्छाम्यतो दुर्लभदर्शना निपुणिका।

अलका – किमेतन्निपुणिके।

सरस्वती – प्रियसखीमदनिकाकृते किंचिदुपायनं निपुणिकयाऽऽनीतं भवेत्।

निपुणिका – सत्यमाह भवती। राज्ञीप्रेषितमिदं मदनिकायै दातुम्।

सरस्वती – पश्यामः किमिति। [अनावृणोति।]

अलका – अलंकाराः सौभाग्यपरिधानं च।

सरस्वती – आर्ये, राज्ञी ननु भविष्यज्जानाति वस्तु।

मदनिका – कुत एतत्।

सरस्वती – यदिदं लघुवसनं प्रेषितं तत्कुमारार्हम्। न कुमार्या युक्तम्। अतोऽसंशयं मदनिका कुमारमाता भवित्री।

मदनिका – (अलीकक्रोपेन) नाहं संभाषयिष्ये।

सरस्वती – केन सह।

मदनिका – त्वया सह।

सरस्वती – तत्तु ज्ञातमेव। यदा दारिका चित्तहारिका शुक्रतारका भवती संभूता तदाप्रभृति कुतो मया सह संभाषणम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका – अलं कलहेन । निपुणिके, समर्पयेदं मदनिकावसनाञ्चले ।

निपुणिका – यथाह भवती । [तथा निपुणिका करोति ।]

सरस्वती –

यस्य बालकस्य । पिता स्याद् गोपालः ।
स्वयमजापालः । भविताऽसौ ॥ ४ ॥

मदनिका –

यस्या बालिकायाः । सरस्वती माता ।
सरःपङ्कगता । भवतीयम् ॥ ५ ॥

अलका – कोलाहलप्रिये युवाम् ।

रघुनाथकन्या । सरस्वतीधन्या ।
सुचरितवाण्या । जगन्मान्या ॥ ६ ॥
मदनिकासुतः । गोपालपालितः ।
धनधान्ययुतः । सौख्यशाली ॥ ७ ॥

सरस्वती – आर्ये, पक्षपातोऽयं प्रकटितः । मम तु दारिका । अस्याः कनीयस्यास्तु सुतः । तथा स धनवान् । मम कन्या तु वाचाला ।

अलका – कलहप्रिया त्वं वायुनापि कलहं करिष्यसि । निपुणिके, गृहाणेमं प्रसादांशम् । [तस्यै ददाति ।]

निपुणिका – (गृहीत्वा) मदनिके, मया त्वत्कृते किंचिदानीतम् ।

मदनिका – देहि । देहि तत् । हतके, तत्तु प्रथमं देयम् । अपि चावधारय । यदि कपटं करोषि तर्हि तव विवाहसमयेऽपि किंचित्प्रत्यर्पयिष्यामि ते ।

सरस्वती – कथं निपुणिकाया अपि विवाहः ? को नियुक्तो भर्ता ?

मदनिका – नाद्यापि नियुक्तः । अस्ति पुनर्गोविन्दभट्टः ।

सरस्वती – साधु । किं तवापत्यं पुत्रोऽभिमतः कन्या वा ।

निपुणिका – (सलज्जं) नाहं जाने ।

सरस्वती – तर्हि,

तव निपुणिके । युगलसन्ततिः ।
भवतु च भूतिः । गोविन्दस्य ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका – मैवमुपहसतु भवती । दैवाधीनमिदं सर्वम् ।

निपुणिका – (जातिपुष्पं मदनिकायै दत्वा) इदं तत् । गच्छाम्यधुना । देव्या सत्वरमाहूता ।

अलका – सरस्वति । देहि तस्याः सौभाग्यतिलकम् ।

[सरस्वती तथा करोति ।]

निपुणिका – आर्ये, कुतो लब्धेयं मुद्रिका ? (तां निरीक्ष्य) विदर्भराजमुद्रेयम् ।

सरस्वती – (स्मयमाना) रहस्यं तत् ।

निपुणिका – आमन्त्रये भवतीः । [निष्क्रान्ता ।]

मदनिका – श्रान्ताहमधुना ।

सरस्वती – कुतस्ते विश्रान्तिरिदानीम् ।

अलका – एहि मदनिके, सान्ध्यपूजां निर्वर्तय ।

मदनिका – यथोपदिशत्यार्या । [तां हस्ते धृत्वा निष्क्रान्ताऽलका ।]

सरस्वती – मातृदैवतवद् विराजते कविपत्नी ।

(खमाजः, त्रिताल ।)

एषा नलिनदलकोमला
तरला तटिनी शीतलनिर्मलसलिला ॥
स्नेहमयी मणिमाला ॥ धृ० ॥
इयमवतीर्णा वास्तुदेवता । सकलान् दयानुयाता ॥
प्रसादपूर्णा वचनातीता । मूर्तिमती प्रभुलीला ॥ १ ॥

[निष्क्रान्ता ।]

[ततः प्रविशति निजहर्म्यचतुष्के सचिन्ता देवी वसुधा ।]

वसुधा – (स्वगतं) द्वितीयोऽयं समयः । कालिदासस्यानुपस्थितौ महाराजो विशेषतो विमनस्कः । न कालिदासनिर्गमनं मे हिताय । यदा सोऽत्रोज्जयिन्यां वर्तते तदा प्रसन्नमना देवो मय्यप्यधिकं स्निह्यति । कालिदासस्य कविता तस्य प्रेमोल्लासिन्येव भवतीत्यनुभवः । [निपुणिका प्रविशति ।] निपुणिके, कथमुपस्थिता ।

निपुणिका – मदनिकादोहदोत्सवे भवती निमन्त्रिता ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसुधा – अप्युपायनं प्रेषितम् ?

निपुणिका – प्रेषितमेव देवि । मया स्वयमेव समर्पितम् । तत्र च किंचिदाश्चर्यं दृष्टम् ।

वसुधा – किमिदम् ?

निपुणिका – सरस्वती विदर्भराजमुद्रिकां परिहितवती ।

वसुधा – एवम् ? (विमृश्य) भवतु ।

प्रतीहारी – (प्रविश्य) देवि, पण्डितराजः समुपस्थितः । भवद्दर्शनं याचते ।

वसुधा – (समृकुटिभङ्गं विमृश्य) प्रवेश्यतामयम् । (प्रतीहारी निष्क्रान्ता ।) निपुणिके, न मम गमनं संभवत्यधुना । ननु ज्ञायते कुत्र वर्तते महाराजः ।

निपुणिका – स्वाध्यायमन्दिरे नयाध्यक्षेण सह विक्रमोर्वशीयं पठतीति ज्ञातम् ।

[पण्डितराजः प्रविशति ।]

पण्डितराजः – देवि, महाराजो विक्रमोर्वशीयं पठति । नैतत्समीचीनम् ।

वसुधा – कथमिव ।

पण्डितराजः – तदपि कालिदासगौरवं पुष्णाति ।

वसुधा – ननु नैव तत् कदाचिदपि न्यूनतां प्राप्तम् ।

पण्डितराजः – तथापि भवतीमप्यतिशयानमिदं मूल एव खण्डनमर्हति ।

वसुधा – प्ररूढमूलमिदम् । निपुणिके, गत्वा निवेदय देव्यायलकायै यन्नाहमुपस्थातुं पारयाम्यद्य ।

निपुणिका – यथाज्ञापयति देवी । [निष्क्रान्ता ।]

पण्डितराजः – कथं कालिदासगृहं भवती गन्तुकामा ?

वसुधा – दोहदोत्सवाय निमन्त्रिता ।

पण्डितराजः – कस्याः ।

वसुधा – मदनिकाया गोपालभट्टपत्न्याः ।

पण्डितराजः – सरस्वत्या अप्युत्सवः कर्तव्यः कालिदासगृहे । ननु न जानाति देवी–

वसुधा – नाहं जाने न वा ज्ञातुमुत्सहे ।

पण्डितराजः – तत्किमेतदप्यनिष्टाचरणमदण्ड्यम् । मया तु तर्क्यते दुःखितया देव्याऽलकयाऽत एव भवती निमन्त्रिता । यत्सर्वं प्रत्यक्षीकृत्य देवी किंचित्करिष्यतीति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसुधा—नैवं संभाव्यम् ।

पण्डितराजः—तत्को दोषः सत्यान्वेषणे । सरस्वत्या कालिदासोऽत्र कृच्छ्रे निपातितः । तस्य विदर्भबन्धनान्मुक्तिकाले राष्ट्रद्रोहिण्या सरस्वत्या स निजबन्धने दृढीकृतः । विदर्भेशगूढप्रणिधिः सा । अतस्तस्या उज्जयिनीतो निष्कासनेऽवश्यं यतितव्यम् ।

वसुधा—नाहं विश्वसिम्यस्यां कथायाम् । अलकासखी सा सरस्वती ।

पण्डितराजः—न भवती जानाति तथ्यमत्र ।

वसुधा—यदि सर्वमिदमसत्यं परिणमेत्—

पण्डितराजः—तद् यत् किमपि शासनं स्वीकरिष्यामि ।

वसुधा—साधु । कुन्तलेभ्यः कालिदासागमनानन्तरमिदं विचार्यम् । तदा कथयिष्यामि महाराजाय ।

पण्डितराजः—नैतन्न्याय्यं देवि । नालका किंचिद् वक्तुं तदा प्रभवति । तथा च न महाराजमनसि कालिदासकाव्यसंबन्धिनी प्रीतिर्युक्ता ।

वसुधा—कथयामि ते पण्डितराज, कालिदासस्य कवित्वप्रभावे न ममाशङ्का । यद् भवतेतरदुक्तं तत्तु विमर्शार्हम् ।

पण्डितराजः—सत्वरं महाराजमेवोपगच्छावः । नयपतिरपि संनिहितः ।

वसुधा—कथं पुनः सत्यासत्यनिर्णयः ।

पण्डितराजः—प्रथमं सरस्वती किल निमन्त्रयितव्या । यदि सा न सत्यं कथयेत् तर्हीतरत् किंचित् प्रयोक्ष्यामः ।

वसुधा—अग्रतो यातु भवान् । अहमनुसरामि । परमिदमवधार्यतां भवता । यदीदं सर्वमनृतं निष्पद्येत तर्हि भवन्तं दण्डयितुमहमेव महाराजं प्रार्थयेय ।

पण्डितराजः—युज्यते । [निष्क्रान्तः ।]

वसुधा—कथं कालिदास एतस्मात् कृच्छ्रादुत्तरिष्यतीति न जाने ।

(जयजयवन्ती,—त्रितालः)

कालिदासचरितं न च जाने
चेतो दोलायतीव पवने ॥
महाद्रिशिखरे सुखमासीनो
निपतितो दरीतले वा घने ॥ १० ॥

[चिन्ताक्रान्ता निष्क्रान्ता ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति राजा विक्रमादित्यः स्वाध्यायमन्दिरेऽलंकृतासनोपविष्टः । समीपे नयाध्यक्षो न्यायमीमांसादिशास्त्रनिपुणः पण्डितो ब्रह्मदत्तशर्मोपविष्टः । विक्रमोर्वशीयं चर्चाविषयत्वेन पुरः स्थितम् ।]

ब्रह्मदत्तः—(पठति ।)

नद्या[1] इव प्रवाहो विषमशिलासंकटस्खलितवेगः ।
विघ्नितसमागमसुखो मनसिशयः शतगुणो भवति ॥ ११ ॥

राजा—साधु । साधु । समीचीनोपमा । सर्वाण्युपमानान्युपमेयानि च कालिदासस्य कल्पनाचातुर्यं प्रथयन्ति । उपमा कालिदासस्यैवेति वदिष्यन्ति नूनं भाविरसिकाः ।

ब्रह्मदत्तः—सत्यमुपमाचतुरः कालिदासः । विक्रमोर्वशीयमिति नाटकनाम विधाय पुरूरवसा भवन्तं विक्रमादित्यमुपमिमीते ।

राजा—क्व स इन्द्रसखः पुरूरवाः क्व चायं मर्त्यो जनः । कालिदासस्यास्मासु प्रीतिरेवात्रौपम्ये हेतुः ।

ब्रह्मदत्तः—यदि स्नेहानुवर्तनमिदं मन्येत तदाऽनवस्थाप्रसङ्गः स्यात् ।

राजा—कथमिव ।

[वसुधा पण्डितराजश्चैकतः प्रविशतः ।]

ब्रह्मदत्तः—काशीराजपुत्रीमनादृत्योर्वश्यनुनयोऽपि भवति महाभागेऽध्यारोपितो भवेत् ।

राजा—नैवं मन्तव्यं नयपते । उर्वश्यपि विक्रमादित्येऽस्मिन्नुरक्ता भवेदित्यतिशयोक्तिरभिप्रेता कविकालिदासस्य । (वसुधां दृष्ट्वा) कथं वा मन्यते देवी ।

वसुधा—जानामि चाटूक्तिचतुरं कालिदासम् । अत्र तु किंचिदन्यदुपस्थितम् । यदि श्रोतुमिच्छति भवांस्तत् प्रष्टव्योऽयं पण्डितराजः ।

राजा—जानामि भवत्याः पण्डितराजस्य च कालिदासेऽसूया । किमेतदभिनवमिदानीम् ।

वसुधा—अप्रियमपि सत्यं श्रोतव्यमेव लोकनाथेन । सत्यासत्यविवेके प्रभवति भवान् नयपतिसहायः ।

---

१ विक्रमोर्वशीये ३-८.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ब्रह्मदत्तः—युज्यते । उच्यतां पण्डितराज, कोऽयं वृत्तान्तः ।

पण्डितराजः—(उपसृत्य) देव, अभिवादये । श्रुतं मया—

राजा—विरमतु भवान् क्षणमात्रम् । यदि कालिदासेऽसत्यो दोषारोपः क्रियेत तत्किं विधातव्यमिति प्रथममेव निर्णेतव्यम् ।

वसुधा—यदाज्ञापयति भवान् ।

राजा—नयपते, भवानत्र प्रमाणम् ।

ब्रह्मदत्तः—नायं न्यायालयप्रविष्टोऽर्थः । अतः—

वसुधा—यदा महाराजः स्वयमेव भवन्तं प्रमाणं मन्यते तत्कथमेष न न्यायालयप्रविष्टोऽर्थः । अयं पण्डितराजस्तु भवदाज्ञापितं कमपि दण्डं स्वीकुर्यात् ।

ब्रह्मदत्तः—न पुनः कालिदासानुपस्थितौ निर्णयः कर्तव्यः ।

वसुधा—नैवं वक्तुमर्हति भवानविज्ञायैव दोषारोपम् । क्वचिदीदृशोऽप्यपराधः संभवति यस्य निर्णयः कालिदासस्यानुपस्थितावेव निःसन्दिग्धतया सुलभ उचितश्च भवेत् ।

राजा—नयपते, कालिदासानुपस्थितावपि तदारोपितापराधश्रवणं न दोषाय । निर्णयस्तु सर्वं सम्यग्विमृश्यैव प्रतिपादनीयः ।

ब्रह्मदत्तः—तर्हि निरूपयतु देवो वृथारोपवक्तुः शासनम् ।

वसुधा—उक्तमेव पण्डितराजः कमपि दण्डं स्वीकुर्यात् । न तन्निर्णये कालक्षेपः समुचितः प्रथममेव ।

ब्रह्मदत्तः—उच्यतां तत् पण्डितराज भवतो निवेदनम् ।

पण्डितराजः—शृणोतु भवान् । यदा विदर्भदौत्ये कालिदासः प्रेषितः—

राजा—बहुपीडानुभूता तदा तेन महामनसा मालवकार्ये । न तं विना तु विदर्भेण सह सन्धिः सुकरोऽभविष्यत् ।

वसुधा—तदा तस्य वर्तनं हितकरं मतं भवता । तस्य परिणतिस्त्वधुना ज्ञायते ।

राजा—कथमिव ।

पण्डितराजः—तदा बन्धावासान्मुक्तिः कालिदासस्य कयाचिल्ललनया कृता ।

राजा—श्रुतमेतत् । जानीमस्तां ललनामपि । ऋणिनो वयं तस्याः ।

ब्रह्मदत्तः—कैषा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—मालविकाग्निमित्रे यया मालविकाभूमिका स्वीकृता या च विक्रमोर्वशीय उर्वशीरूपेण रङ्गेऽवतरिष्यति सा विदिशाकन्यका सरस्वती ।

ब्रह्मदत्तः—सर्वे रसिकास्तस्या अभिनयेन प्रीताः ।

पण्डितराजः—तथापि तस्याः कालिदासभवने निवासो न रोचते केभ्यश्चनेति श्रुतम् ।

वसुधा—कथं रोचेत । भवतापि श्रुतं भवेदिदं नयपते ।

पण्डितराजः—एषा सरस्वती विदर्भेशस्य गुप्तप्रणिधिर्भूता । तया सह विदर्भेश्वरस्य वृत्तान्तप्रेषणं रहसि प्रतिज्ञाय कालिदासो मुक्तः प्रतिनिवृत्तश्चेति मन्यते ।

राजा—तत्किं कालिदासो विदर्भगुप्तचर इति प्रवक्ति भवान् ।

पण्डितराजः—सरस्वती चेत्युपन्यस्तम् ।

राजा—न ह्येतत् संभवति ।

सवितुर्नैव किरणस्तमोरूपेण संभवेत् ।
अमरत्वप्रदाय्येतदमृतं न विषं भवेत् ॥ १२ ॥

ब्रह्मदत्तः—भवतः कालिदासप्रीतिर्न भावान्तरं श्रोतुं सहते ।

एकं सद्ब्रह्म सहते नान्यत्तत्त्वं जगद्भृतम् ।
राजान्तरं न सहते स्वोद्देशे भूपतिः क्वचित् ॥ १३ ॥

तथापीदं केवलं पण्डितराजकथितं, नाद्यापि सिद्धम् । श्रोतव्यं तु निर्णयाधिकारात् ।

राजा—न केवलं दूषणं कालिदासस्य सरस्वत्या अपि । धैर्यशालिनी ललनासौ ।

ब्रह्मदत्तः—गहनः स्त्रीस्वभावः । चञ्चलश्च निरूपितः ।

राजा—नयपतिर्भवान् । अतः—

यथा शब्दः प्रमाणं स्यात् सद्विधिप्रतिषेधयोः ।
तथादेशश्च भवतो युक्तायुक्तविनिश्चये ॥ १४ ॥

पण्डितराजः—अधुनाऽपि द्वयोरेकत्र निवासस्तयो रहस्यनिदर्शकः ।

ब्रह्मदत्तः—बाढम् । समाप्तं कथनीयम् ?

पण्डितराजः—यदि पूर्वनिरूपणं ग्राह्यं तदग्रतो वक्ष्यामि ।

ब्रह्मदत्तः—ग्राह्याग्राह्यविवेको भविष्यति यथाकालं यथाप्रमाणम् ।

पण्डितराजः—तत्किं न सत्यं वदामि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ब्रह्मदत्तः – प्रमाणैरेव सर्वविषये सम्यग्ज्ञानम् । न कस्यापि वचनेन ।

अनभिज्ञः प्रमाणानां न प्रमानुगतो भवेत् ।
दिनेशो नोदयं यायाद् जन्मान्धस्य कदाचन ॥ १५ ॥

वसुधा – सम्यगाह नयपतिः । भवद्वचनेनैव निर्णयः स्यात् ।

भवतो वचनादेव निर्णयो नयमण्डले ।
क्रियापदं सदा वाक्ये कर्तुरन्यं न वान्वियात् ॥ १६ ॥

राजा – साधूक्तं देवि ।

ब्रह्मदत्तः – अत्र विमर्शो युक्तः । अयुक्ताचरणं च दण्डार्हम् । अथ यावत्कालं न कालिदासः संनिहितस्तावत् –

वसुधा – प्रसीदतु नयपतिः ।

विलम्बं नैव सहते कुव्याधिमथनेऽगदे ।
न क्षिपेच्च भिषक्कालं दुष्टस्याङ्गस्य कृन्तने ॥ १७ ॥

राजा – तत्कथं मन्यते देवी ।

वसुधा – सरस्वती संनिहिता । साऽऽहूतव्या । प्रायः सत्यं कथयेदेव । एवं कृतेऽपि यदि न दूषणं सिद्धं तत्र नयपतिः प्रमाणम् ।

ब्रह्मदत्तः – प्रथमः कल्पः ।

राजा – नैतदुपपद्यते । भूतार्थस्त्वन्यथैव ।

वसुधा – तर्हि न दोषस्तत्प्रस्थापने ।

राजा – स्मरति भवती यत्प्रतिज्ञातं वृथारोपदर्शने ।

वसुधा – आम् । तस्मिन् सत्ये दर्शिते च नयपतिना यत्प्रतिज्ञातं तदपि मा विस्मरतु भर्ता

कञ्चुकी – [प्रविश्य]

वियन्मध्यारूढो विकटतपनो ग्रीष्मसमये
जनो गाहं शीते सुखदसलिले चात्र कुरुते ।
अतो नित्यं कृत्यं प्रतिदिवसमध्याह्नविहितं
भवानङ्गीकुर्यादिति विनतविज्ञापनमिह ॥ १८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—चक्रधर, तिष्ठतु तत् । दूतं प्रेषित्वा कालिदासगृहाद् देवी सरस्वती समानेया सत्वरम् ।

कञ्चुकी—यथाज्ञापयति देवः । [निष्क्रान्तः ।]

राजा—नयपते, सम्यग्विमृशतु भवान् कतमत् कालिदासकाव्यं भवदाह्लादकरम् ।

ब्रह्मदत्तः—मेघदूतमेव प्रियं मे । न तथा तस्य नाटकं मनो मे समाकर्षति ।

राजा—को विशेषस्तस्य काव्यस्येति मन्यते भवान् ।

ब्रह्मदत्तः—यथा भवतोक्तं तथोपमा कालिदासस्यैवेति ।

राजा—कथं तस्यार्थान्तरन्यासा मता भवता ।

ब्रह्मदत्तः—ते वस्तुत उपमालङ्कारा एव दृष्टान्तनिदर्शनादिमूलाः ।

राजा—तथापि मन्ये भविष्यदालङ्कारिकाः कालिदासकृतिं बहु मन्यमाना अर्थान्तरन्यासमलङ्कारान्तरं मन्येरन् ।

द्वारपालः—(प्रविश्य) जयतु जयतु देवः । कुन्तलेभ्यः सन्देशपत्रं प्राप्तम् ।

राजा—नयपते, नामात्यराजः संनिहितः । भवानेव सन्देशमिमं पठतु ।

ब्रह्मदत्तः—(सन्देशं गृहीत्वोद्घाट्य) कालिदासेन प्रेषितः ।

राजा—(द्वारपालं प्रति) भद्रमुख, स्वं नियोगमशून्यं कुरु ।

द्वारपालः—यथाज्ञापयति देवः । [निष्क्रान्तः ।]

राजा—(पण्डितराजे नेत्रपातं कृत्वा) कः सन्देशः प्रेषितः ।

ब्रह्मदत्तः—(नृपदृष्टिपातं वीक्ष्य विज्ञाय च) कुन्तलेश—माननृपयोः सीमाविवादः कालिदासदौत्येनोपशान्तः । अपि च कालिदासो भवन्तमभिवादयति—

सर्वतीर्थोदकैर्धौते भूमिलालनरञ्जिते ।
चरणे भवतां दासो बध्नाति विनयाञ्जलिम् ॥ १९ ॥

भवत्सेवाजलाकाङ्क्षी स्थानेऽयं निर्जले जनः ।
विशालकरुणासिन्धुं भवन्तं देव वन्दते ॥ २० ॥

[सरस्वती प्रविशति ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तथा हि,—

दर्शनं न चरणाम्बुजयोर्यद्
दूरदेशविगतस्य ममात्र ।
वन्दनां तु विदधामि विदेशात्
स्वीकुरुष्व करुणाकर तां मे ॥ २१ ॥

तथा च देव्यपि वन्दिता—

वन्देऽहं वसुधां देवीं पुत्रवत्पालितो यया ।
जगन्मात्रा रमादेव्या यथा स चतुराननः ॥ २२ ॥

अहो विदग्धत्वम् ।

वसुधा—उपकृतास्मि ।

पण्डितराजः—आत्मानं चतुराननमिति वर्णयन्—

राजा—चतुराननस्यैवावतारो भवितुमर्हति ।

सरस्वती—ननु चतुरमेवाननं तस्य । देव वन्दे । देवि वन्दे ।

राजा—उपविशतु भवती । नयपते, कदा प्रतिनिवर्तिष्यते कालिदासः । अपि किंचिल्लिखितं तेन ।

ब्रह्मदत्तः—आम् । भवान् स्वयमेवेमं लेखं पठतु । (लेखमर्पयति ।)

राजा—(गृहीत्वा, पठित्वा च) कथं कुन्तलेशः कालिदासं निजसभायां निवेशयितुमिच्छति ।

वसुधा—बहुमानोऽस्य । सुखेन तत्र तिष्ठतु ।

राजा—कालिदासेन कुन्तलेषु स्थातव्यम्? नयपते । अस्योत्तरमनन्तरं दास्यामः । प्रथमं नयान्वेषणं भवतु ।

ब्रह्मदत्तः—आर्ये सरस्वति, भवती जनताप्रेमास्पदमिति वन्दनीया । तथापि न्यायाधिकृततया किंचिदुच्यते मयाऽरुचिकरं तत्क्षन्तव्यम् ।

सरस्वती—किमेतत् ।

ब्रह्मदत्तः—भवती विदर्भगुप्तप्रणिधिरिति दोषारोपः क्रियते कैश्चित् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वती – किमाधारं वचनीयमिदम् ।

ब्रह्मदत्तः – भवती विदर्भेशगुप्तचरत्वेनैव कालिदासं दृष्टवती । तं निजगुणैर्मोहितवती । तेन सह चास्मिन् राज्ये वासं कृतवतीति कार्यकारणमीमांसा ।

सरस्वती – किं तर्हि सुगृहीतनामधेयः कालिदासोऽपि राजद्रोहित्वेन वर्ण्यते ?

ब्रह्मदत्तः – एवमेव ।

सरस्वती – केवलं मम कालिदासभवने निवास एवात्र हेतुः ?

ब्रह्मदत्तः – अथ किम् ।

सरस्वती – ननु तस्य नाटकेऽहं पात्रत्वेन नटामीत्येव तत्र वासे हेतुः ।

ब्रह्मदत्तः – तदपि मिषं राष्ट्रद्रोहपूर्तय एवेति मन्यते ।

सरस्वती – क एवं ब्रवीति ।

ब्रह्मदत्तः – न तत् प्रस्तुतम् । अत्र यद् भवत्या कथनीयं तदुच्यताम् । तथा कृते यदि निवेदयितुरुपस्थितिरावश्यकी मता तत्स आहूयेतास्माभिः ।

सरस्वती – (राजानं प्रति) महाराज, सर्वस्यास्य प्रतिवचनं दातुमनुज्ञां याचे ।

राजा – भावि यन्न तदन्यथा । उज्जयिन्यां निवासे हेतुः कथ्यतां भवत्या ।

सरस्वती – (नेपथ्याभिमुखं विलोक्य) प्रभो रघुनाथ त्वमेव मे शरणम् । तदाविर्भूयाः ।

[खड्गहस्तो रघुनाथः प्रविशति ।]

रघुनाथः – देव, देवि, कालिदाससहोदरो रघुनाथोऽहमभिवादये । (प्रणमति ।) सरस्वति, तवादेशानुसारं द्वारि स्थितोऽहम् । तत्किमत्राहूतः ?

सरस्वती – भवत्प्रकटनार्थमादिष्टं महाराजेन । देवि, एष मे भर्ता । अतस्तत्सहवासे कालिदासभवने निवसाम्युज्जयिन्याम् । विदर्भेषु बन्धनागारे गान्धर्वविधिना वृतोऽयम् । महाराजस्यार्यकालिदासस्य च संमत्या रक्षितमिदं रहस्यमद्ययावत् । भवतां सर्वेषामाशीर्वचनमिमौ दम्पती याचेते ।

(गरुडध्वनिः - त्रितालः ।)

भवदाशिषा मम जीवनदोषा देव भवतादुषाः ॥
बालरविणा दीप्तिररुणा तमो विधत्तां सा मृषा ॥ २३ ॥

तत्प्रसीदन्तु भगवन्तः । उज्जयिनीस्नुषैवाहमत्र निवसामि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – जानामीदं सर्वम् । उच्यतां नयपते, वृथारोपस्य निष्कृतिः ।

पण्डितराजः – गुप्तप्रणिधित्वारोपः कथमेतेन निरस्तः ?

राजा – देवि, विवरणीयमतःपरं किमपि ?

वसुधा – सरस्वती विदर्भमुद्रिकामङ्गुल्यां धारयति । अतोऽन्यत् किंचिद् बलवत्तरं निमित्तं तत्र दर्शयितव्यं नयपते ।

राजा – साधु । न रुचिरं किञ्चिच्चिराय विचरति । अहमेव सर्वं विशदीकरोमि । सरस्वत्या राष्ट्रोपयुक्तगुणान् मनसि कृत्वा मयैव साऽऽदिष्टा निजविवाहवृत्तान्तगूहनाय । कालिदासस्य वर्धिष्णुयशसा परराष्ट्रनिवासिनोऽपि तद्दर्शनायोज्जयिनीमायान्ति । न तु ते सर्वे रसिकाः । केचित्तु गुप्तप्रणिधयोऽपि । गतसंवत्सरे कश्चित्कोसलप्रणिधिरस्माभिर्दण्डित इति जानन्ति भवन्तः । स सरस्वतीचातुर्येणैव निबद्धः । ये ये कालिदासं द्रष्टुमुपयान्ति ते सर्वे सरस्वतीपर्यवेक्षणे स्थाप्यन्तेऽस्माभिः । तथा न कोऽप्यस्मदुज्जयिनीविप्रियं कर्तुं प्रभवति । अस्मिन् कार्ये नियुक्तेयं सरस्वती विमुक्ताऽद्यप्रभृति । सरस्वति, स्वसंसृतिं सुखेनेतो विदधातु भवती ।

ब्रह्मदत्तः – अकल्पितं सर्वम् ।

वसुधा – वृथा पीडिता सरस्वत्यस्माभिः ।

ब्रह्मदत्तः – महाराजस्य वचनेन सर्वसंशयनिवृत्तिः सर्वारोपनिरासश्च । नातः परं किंचिद्विवेचनीयम् ।

सरस्वती – अनुगृहीतास्मि । (अङ्गुलीयकं गृहीत्वा) महाराज, एषा मुद्रा विदर्भेश्वराल्लब्धा भवदाज्ञया राष्ट्रकार्ये नियुक्ता । अधुना भवच्चरणे न्यस्यामीमाम् । [तां नृपचरणे निदधाति ।]

राजा – ननु साऽपि प्रतिग्रहीतव्या ?

वसुधा – स्मृतिचिह्नत्वेन प्रासादे रक्षणीया ।

राजा – का निष्कृतिर्वृथारोपस्य नयपते ?

वसुधा – कालिदासः स्वयमेव तन्निर्णेष्यति प्रत्यागमनानन्तरम् ।

राजा – युक्तमेतत् । रघुनाथ, अस्मत्संरक्षकदलस्य प्रमुखत्वे स्थाप्यते भवानिदानीम् ।

रघुनाथः – अनुगृहीतोऽस्मि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – सरस्वति, किं ते प्रियं विधेयम् ।

सरस्वती – देव,

(भैरवी–दीपचन्दी)

ऋणिनीयं विदिशायास्तनया ।
चरणनता रघुनाथजाया ॥
भूयादुदिता प्रतिभा कवीनां
सति भवतीशे वसुधायाः ॥ २४ ॥

[सर्वे निष्क्रान्ताः ।]

इति चतुर्थोऽङ्कः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



अलका
(कु. सुरेखा करमरकर)

कालिदास :
(श्री. राजाभाऊ साठे)

[१९-११-१९६१]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

— ५ —

॥ अथ पञ्चमोऽङ्कः ॥

[एकतो मदनिकाऽन्यतश्च निपुणिका प्रविशतो बहिःप्रासादमुज्जयिन्याम् ।]

निपुणिका — मदनिके, कथं त्वमेकाकिनी ।

मदनिका — न देव्यलकाऽऽर्या सरस्वती वाऽऽगन्तुं समर्थे । बालकावतीव दुर्निवारौ ।

निपुणिका — आर्यकालिदाससंमानसमये ताभ्यामागन्तव्यं नाम ।

मदनिका — आर्या सरस्वती शकुन्तलाभूमिकां कृत्वा श्रान्ता । देव्यलकाऽऽर्यस्वागताय सिद्धतां विदधाति ।

निपुणिका — शकुन्तलादर्शनेन महाराजः परमप्रीत इति श्रूयते ।

मदनिका — न तथापि सेनापत्यादयो महान्तं संमानं सोत्सवमनुमन्यन्त इति किंवदन्ती श्रूयते ।

निपुणिका — वर्षद्वयपूर्वं कुन्तलेश्वरदौत्येन गत आर्यकालिदासेऽपि किंचित् कृच्छ्रं समापतितमासीत् ।

मदनिका — न कृच्छ्रमधुना संभवति । यतो राजा राज्ञी च स्वयं संमानाय यतेते ।

निपुणिका — न जाने किं सभायां स्यात् ।

मदनिका — मन्ये नार्यः कालिदासः सर्वैरननुमतं संमानं स्वीकुर्यात् ।

निपुणिका — अत एवार्याऽलका नायाति चेत्—

मदनिका — किमेभिस्तर्कितैः । सत्वरं तत्र गमनमेव युक्तम् । एते समाजना निजासनान्यलंकर्तुं त्वरमाणा दृश्यन्ते ।

[निष्क्रान्ते ।]

निपुणिका — एहि गच्छावः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[उज्जयिन्यां नृपप्रासादे नवरत्नपरिषद् । पारिषदाः प्रविष्टाः ।]

अमात्यराजः—पण्डितराज, ननु सम्यग्विहिता उत्सवसिद्धता ?

पण्डितराजः—संविहिता सर्वा साधनसज्जता ।

अमात्यराजः—नात्र पूजाविषयः कालिदासः समुपस्थितः ?

पण्डितराजः—महाराजः स्वयमेव तमानेष्यति ।

अमात्यराजः—अपि स्वस्वस्थानापन्नास्तौर्यत्रिकादयः ।

पण्डितराजः—अथ किम् ।

अमात्यराजः—सेनापते रुद्रदामन्, अपि उत्सवयात्रायां रक्षाविधानं सुष्ठु व्यवस्थापितम् ?

सेनापतिः—अमात्यराज, नायं कोऽप्यपूर्वः प्रसङ्गः । न केवलं उज्जयिन्याः, अपि तु निखिलस्य राज्यस्य संरक्षणे पलितमिदं मस्तकम् ।

अमात्यराजः—नैवं सेनापते । आधुनिकोऽयं कालो न पुराणकालवत् सुस्थितः । साम्प्रतं यः कश्चिदपि नागरिको निजबालिशत्वेन सर्वां व्यवस्थां व्याकुलयितुं प्रभवति ।

सेनापतिः—सत्यमाह भवान् । रुद्रदामाऽयं पुनः सर्वस्मै पर्याप्तः । न पुनर्जाने किमत्र परिषदि संभवेत् ।

अमात्यराजः—कालिदाससंमानः ।

सेनापतिः—किंप्रकारक एषः ।

अमात्यराजः—वस्त्रभूषणमणिसुवर्णालङ्कारादि यद् यत्कालिदासाय प्रदेयं तत्सकलं कोशाध्यक्षेण व्यवस्थापितम् । अतः परं देवः प्रमाणम् ।

सेनापतिः—यावन्न कविः सेनापतिः क्रियते तावत्समीचीनमिदम् । कथमत्र मन्यते भवान् । कवेः कृते सकलोऽयं व्यतिकरः स्थाने मतो भवता ।

अमात्यराजः—किं मनीषितं भवता सेनापते !

सेनापतिः—अमात्यराज,

कविः काव्योद्देशे चिरपरिचिते स्वैरचरिते
सुखं भ्राम्यत्वेष प्रतिपदघने श्लिष्टरचने ।
कुतस्तस्य स्थानं प्रकटविकटे राज्यशकटे
न युक्तं पुष्पाणां तदुपहसितं शस्त्रतुलितम् ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पण्डितराजः—कथं कविमत्सरग्रस्तः सेनापतिः। सेनापते, पुष्पाणां नोपहास एष यदि तानि शस्त्रैस्तुलितानि। शस्त्रेभ्योऽपि प्रभाववत्तराणि पुष्पाणि ननु।

सेनापतिः—कुत एतदुच्यते।

पण्डितराजः—(विहस्य) ननु न जानाति भवान्।

प्रायो न वेत्ति दलभारपतिः पुराणं
व्याख्यानमेतदथवा ननु वर्तमानम्।
पुष्पायुधप्रतिहता नरपुंगवास्ते
जीवन्त एव तु पुनश्चिरकालदग्धाः॥ २॥

सेनापतिः—पण्डितराज,

श्रुतिपदनिपुणानां पण्डितानां प्रभुस्त्वं
न पुनरवति लोकं श्लिष्टशब्दावलिस्ते।
भवति मदनबाधा सर्वथा निष्क्रियाणां
असिशररसिकानां नैव नैव व्यथेयम्॥ ३॥

पण्डितराजः—कुतो ज्ञातमिदं सेनापते यद् युद्धपण्डितान् न बाधते पुष्पायुधपीडा। प्रत्यक्षीकृतानि कालिदासस्य नाटकानि भवता। तत्र—

दुष्यन्त एष ननु शस्त्रविरक्त आसीत्?
मोहं जगाम परिवीक्ष्य शकुन्तलां यः।
आसीत् शरासिरसिको न पुरूरवाः स
मूढो विलोक्य समभूत् स्त्रियमुर्वशीं यः॥ ४॥

सेनापतिः—कवयः पण्डिताश्चैकमालार्हमणयः। कथं ते पृथङ् मन्येरन्। यत्तेभ्यो रोचते तदेव तैर्वर्ण्यते सरसम्। यतः—

श्रीरामचन्द्रचरितस्य निरूपणार्थे
श्रीकालिदासकविना यतितं न कस्मात्।
किं तस्य नैव विदिता रघुनाथकीर्तिः?
किं वा न युद्धचतुरो ननु रावणारिः?॥ ५॥

पण्डितराजः—नाद्यापि समाप्तिं गता कालिदासप्रतिभा। प्रभुः श्रीरामचन्द्रोऽपि भविष्यति वर्ण्यविषयस्तस्याः। न पुनस्तेन सर्वयोधानां वर्तनमुज्ज्वलं भविष्यति?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नैकेन चन्दनेनात्र सर्वे वृक्षाः सुवासिताः ।
नैकया गङ्गया चापि पावनाः सर्वनिर्झराः ॥ ६ ॥

सेनापतिः—तथापि शृङ्गाररसप्रियाः कवयः । न तेन वीररसाभावः सिद्ध्यति । अपि च,

दिवं गतानां भूपानां नामभिः किमुदाहृतैः ।
एतैर्हि स्खलितैस्तेषां वर्तमाना विवेकिनः ॥ ७ ॥

अमात्यराजः—नैष कलहकालः । अधुना महाराजोऽत्रागमिष्यति ।

[ततः प्रविशति कञ्चुकी ।]

कञ्चुकी—

नवरत्नसभापतिर्नृपः
सह देव्या समुपैति शत्रुहा ।
अरुणस्तिमिरारिरुत्थित
उषसा संगत एति भासुरः ॥ ८ ॥

[ततः प्रविशन्ति राजा राज्ञी कालिदासः परिजनश्च ।]

राजा—(आसने समुपविश्य) सर्वैः पारिषदैरलंक्रियन्तां स्वासनानि । [सर्वे यथोचित-मुपविशन्ति] । पण्डितराज, सर्वं सिद्धमत्र समीचीनम् ?

पण्डितराजः—सिद्धमेव देव ।

राजा—किमद्य विधेयममात्यराज ।

पण्डितराजः—पण्डितपरिषदियं भवताऽऽहूता कालिदाससंमानाय ।

राजा—साधु । तत्प्रस्तुतमनुसरामः ।

पण्डितराजः—(उत्थाय) महाराज, देवि, सभ्याश्च ।

गुणग्राहिण्येषा परिषदिति सर्वत्र विदितं
निषण्णा एतस्यां बहुविधकलाशास्त्रनिपुणाः ।
भवेद्यः पूजार्हः क्वचन नरजन्मा यदनया
भुवि ख्यातो यायादमरपदवीमेष सुभगः ॥ ९ ॥

एतावान् मङ्गलप्रसङ्गो महाराजप्रसादेनाद्योदितः । सर्वेषामस्माकं परिचित-स्तथा च सर्वेषां श्रेष्ठः कालिदासोऽत्रोपविष्टः । ऋतुसंहार-मेघदूत-खण्डकाव्ये तेन

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विरचिते सर्वरसिकैः पठिते एव । तथा चास्य कुमारसंभवं नामाद्याप्यपूर्णं काव्यमत्र वर्तते । गतसंवत्सरे यदाऽसौ कुन्तलदेशं राजदूतत्वेन प्रेषितस्तदा तत्र कुन्तलेश्वरदौत्यमिति ग्रन्थोऽपि तेन प्रणीतः । न तु सोऽस्माभिर्मन्दभाग्यैः पठितो यतोऽतीव तुष्टेन कुन्तलेश्वरेणैव सनिर्बन्धं स निजसकाशं रक्षितः । मेघदूतमपि विदर्भदौत्यसमयेऽनेन विरचितमिति विज्ञातमेव भवताम् । गतसंवत्सरचतुष्टये त्रीणि नाटकान्यप्यनेन प्रणीतानि । तानि भवद्भिः प्रयोगतो दृष्टान्यभिनन्दितानि च । मालविकाग्निमित्रं विक्रमोर्वशीयमभिज्ञानशाकुन्तलं च । चिरंजीविनी कृतानेन तपोवनकन्यका शकुन्तला । दौत्यनैपुण्यं राष्ट्राभिमानश्चास्य प्रथिते एव । अस्य संमान उज्जयिनीजनैरद्य विधीयते । तत्सर्वैरनुज्ञायतामयं प्रस्तावः ।

प्रत्युत्पन्नमतिः प्रजाहितकृतिर्विद्याकलानां पति–
र्विघ्नारुद्धगतिर्यशश्चिरततिर्नित्यं दयासंहतिः ।
काव्यापन्नरतिर्निराहतधृतिश्चासावुदाराकृति–
स्तत्संमानभृतिः, ममात्र विनतिः, स्यात्सर्वसत्संमतिः ॥१०॥

[प्रणम्य निषीदति ।]

सर्वे – साधु ! साधु !

राजा – अस्ति कोऽप्यपरो वक्तुकामः ?

सेनापतिः – देव, भवदनुज्ञया किंचिद्विज्ञापयामि ।

राजा – स्वैरमुदीर्यतां सेनापते ।

सेनापतिः – देव, यथा पण्डितराजेन वर्णितस्तथाऽसंशयं संमानार्हः कालिदासः । एवमत्र तु चिन्तयितव्यम् ।

नराधिप वृता श्रुतिस्मृतिमताऽत्र वाग्देवता
द्विजेन कविता कृता बहुमता बुधैर्लालिता ।
ततो न भवता चमूदलकृता कृतिर्विस्मृता
भवत्विति नता पदे विनिहिता मनीषा हिता ॥ ११ ॥

राजा – साधु, सेनापते, साधु ! रसिकोऽसि । न पुनरवगम्यते कथं संभवति सेनाशौर्यविस्मृतिः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सेनापतिः—निजजीवितदानेनापि सैनिका राष्ट्ररक्षणे दक्षाः । महानयं तेषां त्यागः । न स जनानुरञ्जकेन कविना तुलितो भवेदित्याशासे ।

अधीत्य शास्त्रसंभारं वाङ्मयं जनयेत् कविः ।
गृहीत्वा शस्त्रसंभारं राष्ट्रं रक्षति सैनिकः ॥ १२ ॥

पण्डितराजः—(सहसोत्थाय) कथं कविस्तुल्यते सैनिकेन ।

वितरति मरणं भोः केवलं शस्त्रधारी
कविरिह निजकाव्यैर्नित्यमाह्लादवर्षी ।
कथमथ तुलना स्यादेतयोर्भूतलेऽस्मिन्
मलयजसदृशत्वं याति किं कृष्णसर्पः ? ॥ १३ ॥

राजा—मा मैवं पण्डितराज ।

अरिजनहनने यद् यत्यते सेनयात्र
नरपतिविहिताज्ञा सर्वथा तत्र हेतुः ।
वदसि यदिह शूरः केवलं मृत्युदाता
वचनमनृतमेतद्, रक्षकोऽयं जनानाम् ॥ १४ ॥

शान्तं सेनापते । ज्ञातं भवद्धृदयशल्यम् । कालिदास, ननु वक्तुमीहसे किंचित् ?

कालिदासः—नायं विषयो मया विवरणार्हः । अपि तु

लाभाशया न रचितो मम वाग्विलासो
जानाति भूपतिरिदं स्वयमेव सत्यम् ।
त्यागे तनुर्न गणिता मम राष्ट्रकार्ये
जीवन् स्थितोऽत्र खलु नैष ममापराधः ॥ १५ ॥

अपि च ।

काव्यानन्दे विकसति मनः सज्जनानां सदैव
विद्याहीनैरिह ननु कथं ज्ञायते प्रक्रियैषा ।
आगामिन्या मुनिवरमनोः संततेः संस्कृतेस्ते
निर्मातारो बहुविधकलाकारवृन्दा हि वन्द्याः ॥ १६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तथा हि ।

काव्यज्ञै रसिकैर्गुणाः कविकृतेः सम्यग्विमृश्याः सदा
नैतस्मिन् विषये भवेत् कविजनोऽप्येष प्रमाणं स्वयम् ।
ग्राह्यं भोज्यरुचौ मतं रसविदो भोक्तुर्न सूदस्य यन्
मन्येते पितरौ स्वकं गुणयुतं पुत्रं विमूढं ह्यपि ॥ १७ ॥

तथापि महाराज,

संमानो यदि मे कवेः परिषदे नास्यै क्वचिद्रोचते
कामं देव विसृज्यतां पुनरियं; मा भून्ममात्रादरः ।
यत्काव्यं मम लेखपङ्क्तिषु भवेज् ज्ञास्यन्ति तत्सज्जना
यान्त्येते मधुलोलुपा हि भ्रमराः पद्मं; न तत् षट्पदान् ॥१८॥

तद्भवतानुज्ञातो गृहं गच्छामि ।

राजा—नैवं कालिदास । परनृपानुनयेऽपि कुशलस्य ते कथमेतावता मनःक्षोभः । न परिषदियमत्रापराध्यति । यत्सेनापतिनोक्तं न तदपि तव कवित्वविक्षेपाय । तच्छान्तो भव । सेनापते, जानामि तव भावम् । न पुनर्भवता सम्यगवधारितं संमानप्रयोजनम् । अमात्यराज, सेनापते, श्रुता किल रामायणकथा भवद्भिः ।

उभौ—अथ किम् ।

राजा—एतन्महद् रामचन्द्रयशः कथं भवता ज्ञायतेऽधुनापि कालात्ययेन ।

सेनापतिः—रामायणादेव ।

राजा—साधु । केन रचितं तद् रामायणम् ।

सेनापतिः—आदिकविना वाल्मीकिमुनिना ।

राजा—अत एव च श्रीरामचन्द्रस्य सेनापतेर्नामापि ज्ञायते । तस्यामात्यस्य च । असंशयं प्रभू रामचन्द्रो लोकोत्तरो महापुरुषः । नो चेन्न रामायणनिर्मितिरेवाभविष्यत् । किंतु सा कथा रामायणकाव्येनैव रक्षिता प्रसारिता शाश्वतीकृता च । ननु जानास्येव युद्धं रामरावणयोः सेनापते ।

सेनापतिः—देव जाने ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—तद् युद्धमपि प्रभुरामचन्द्रस्य सेनाभिरेव विजितम् । तत्तु ज्ञायते रामायणमहाकाव्यादेव । सेनापते, सेनया कृतं कार्यं महत् । प्रजापीडा प्रायः पृतनाभिः प्रतिहन्यते । जानीम एतत् । अपि तु सर्वमिदं ज्ञायते पठ्यते च, तत्र कविकृतिरेव कारणम् । क्षणिकः पराक्रमः । तत्काव्यगानं तु चिरंतनम् । भाविवीराणां स्फूर्तिस्थानानि काव्येतिहासेष्वेव लभ्यन्ते । विना पराक्रमं न काव्यनिर्मितिः । विना तु काव्यं कालोदरे लुप्यन्ते सर्वाः शौर्यकथाः । अतोऽस्माकं युष्माकं च चिरंजीवित्वाय प्रभवन्नयं कालिदासः सर्वाधिकः संमाननीयः । अपि च

वह्निज्वाला बलसमुदिताप्यत्र निर्वापिता स्यात्
तस्या औष्ण्यं जनहितकृतिं शाश्वतीं निर्मिमीते ।
नेयाद्देहः परममृतं जीवने मृत्युधेये
काव्यं कुर्यात् सुचिरमहितं तद्यशो निर्विवादम् ॥ १९ ॥

अतः संमाननीयोऽयं कालिदासः । तथापि पारिषदा अत्र प्रमाणम् ।

सेनापतिः—देव साधूपालब्धोऽस्मि । क्रियतां कालिदाससंमानः । न मे तत्राशङ्का । कालिदास,

न मन्तव्यं काव्ये मम विरतिरेवं खलु सखे
न वा हेतुश्चेतस्यवगणयितुं त्वां कविपते ।
तदेतत्क्षन्तव्यं परिषदि यदुक्तं जडधिया
स्वकाव्याम्भोजैस्त्वं विरचय सरस्वत्युपवनम् ॥ २० ॥

राजा—साधु सेनापते साधु । प्रीतोऽस्मि तवर्जुतया ।

सेनापतिः कविवरश्च यतोऽत्र मित्रे
मन्ये विपत्तिरथ कस्य न संभवित्री ।
पीडां प्रजास्वसिलता ननु संहरन्ती
शब्देन हर्षजनकेन समागतेयम् ॥ २१ ॥

अमात्यराज पठ्यतामस्माच्छासनम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अमात्यराजः—यथाज्ञापयति देवः । [शासनं गृहीत्वा पठति ।]

'स्वस्ति श्रीशासत्यवन्तीन् विक्रमादित्ये चन्द्रगुप्ते मालवपतौ, उज्जयिन्याः सुपुत्रेण राजकविकालिदासेन काव्यरचनया च यन्महत्कार्यं संपादितं तत्प्रीत्या तस्मै कविकुलगुरुरित्युपाधिः समर्प्यते । अलंकारादि च यथोचितमस्मै वितीर्यते । अपि च येयं नवरत्नपरिषत्स्थापिता संवर्धिता च तस्या धुर्यद्यप्रभृति कविकुलगुरुः कालिदासः स्थाप्यतेऽनेन शासनेन' इति ।

सर्वे—साधु । शोभनम् ।

[शासनं वस्त्रालंकारादि राज्ञीहस्तेन कालिदासाय समर्प्यते ।]

राजा—नाद्यान्यत् कार्यं विधेयम् । विसृज्यतां परिषदियं महोत्सवश्च प्रस्तूयताम् ।

कालिदासः—सुतरामुपकृतोऽस्मि खलु दीयमानेन सर्वेणालंकारादिना । सर्वमेतत्सत्पात्रेभ्योऽर्थिभ्यो मदीयमिति कृत्वा देयमित्येव मेऽभ्यर्थना ।

वसुधा—सर्वमन्यद् ददातु भवान् । एकेयं रत्नमाला मया दीयते सा तु देव्यायलकायै प्रदेया, स्वहस्तेन च तत्कण्ठे करणीया ।

कालिदासः—यथाज्ञापयति देवी । महाराज,

परिषदि कविरेवं गौरवं नीत एष
जनहितरतधन्यो मानितोऽस्म्यद्य राज्ञा ।
किमपि न महदस्मादर्जनीयं मयेह
जगति सुजनदासः कालिदासो विनीतः ॥ २२ ॥

[सर्वे निष्क्रान्ताः ।]

[ततः प्रविशति बहिःप्रासादं गोपालभट्ट एकतः । अन्यतश्च गोविन्दभट्टः ।]

गोविन्दः—रे गोपाल ! कालिदासेन लब्धा कीर्तिः, भवता चार्जिता प्रीतिः, अस्माकं तु का गतिः ?

गोपालः—मुक्तिः ।

गोविन्दः—कथं जीवतो मे मुक्तिः ।

गोपालः—वयं बद्धा भवांस्तु मुक्त एव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोविन्दः—कथं त्वं बद्धः ।

गोपालः—संसारपाशैः ।

गोविन्दः—कया ।

गोपालः—मदनिकया ।

गोविन्दः—तर्हि बन्ध एव मे प्रियः ।

गोपालः—मैवम् । प्रियवयस्य, बुद्धोऽहं प्रबुद्धोऽहं विप्रबुद्धोऽहमधुना । अपि तूदके गते सेतुबन्ध इव मेऽयं प्रबोधः । मा ते स्खलनं भवतु । मा स्त्रीपाशे बद्धो भूः ।

गोविन्दः—स्वयं स्त्रीसुखमवाप्य कथं मां वञ्चयसि ।

गोपालः—न हि रे अप्रबुद्ध । दूरत एव नारी प्रिया । तस्याः पाणिग्रहणेन स्वहस्तयोर्दृढ-लोहशृंखला बध्यते । न केवलं हस्तयोः पादयोश्चापि ।

गोविन्दः—न जाने किं वदसि । विशदं ब्रूहि ।

गोपालः—पश्य माम् । कमपि भेदं पश्यसि ?

गोविन्दः—तुन्दिलतनुर्जातोऽसि ।

गोपालः—ननु कथमेवं जातः ! जानास्येतत् ? भोः, संसारदुःखप्रस्तरा उदरे मे निविष्टाः ।

गोविन्दः—असत्यमेतत् । न किंचित्प्रविशति दुःखं तवोदरे ।

गोपालः—अरे पश्य भोजनादिकम् । नाहं प्रभूतमन्नं भक्षयामि । जानास्येवेदम् ।

गोविन्दः—केवलमेकमहिषाहारस्त्वम् । नूनं न ततोऽधिकं भक्ष्यते त्वया ।

गोपालः—अधुना यदा यदाहं वदामि, 'मदनिके पर्याप्तं मे भोजनं' तदा तदा सा 'नाथ, स्वादु मोदकादि । अधिकतरं भक्षणीयं, जानामि ते भोजनप्रियतां' इत्युक्त्वा पुनरपि मोदकादि प्रयच्छति ।

गोविन्दः—(मुखनादं कुर्वन्) मोदकादि ?

गोपालः—आम् ।

गोविन्दः—अपूपाः ।

गोपालः—आम् ।

गोविन्दः—क्षीरम् ।

गोपालः—आम् ।

गोविन्दः—गुडपुरोडाशम् ।

गोपालः—आम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोविन्दः—तर्हि मयापि जायाऽर्जनीया ।

गोपालः—अरे न पुनर्भक्षणे शक्तोऽस्मि ।

गोविन्दः—कथं रे न मोदकादिभक्षणे समर्थः ?

गोपालः—न तत् त्वं जानास्यद्यापि । अथ सर्वभक्षणानन्तरं जडोदरं सुप्तं मामुपसृत्य सा मां प्रबोधयति, वदति च 'नाथ, आपणे गन्तव्यं' इति ।

गोविन्दः—केन हेतुना ?

गोपालः—अधिकखाद्यपदार्थानानेतुम् ।

गोविन्दः—एवं तर्हि मयापि गृहस्थाश्रमः स्वीकर्तव्यः ।

गोपालः—इयत् क्रन्दनं तव कृते करोमि न तथापि ते मनःपरिवर्तनम्?

गोविन्दः—तव मतपरिवर्तनं मदनिकया कृतम् । ममापि—

[निपुणिका मदनिका च प्रविशतः]

निपुणिका—अहं करोम्येतत् । मदनिके, मा ते तत्र चिन्ता । रे गोपालभट्ट, त्वं नान्नं भक्षयसीति मदनिका चिन्ताग्रस्ता । किमेतत् ।

गोपालः—मातर्—

निपुणिका—नाहं माता,—अद्यापि । कथमेषोऽविनयः ।

गोविन्दः—भविष्यसि । मा शोकं कृथाः । यदीयं मदनिका माता भूत्वा त्वामुपहसति तर्हि तत्रैक उपायः । अहमेवात्र भिषक् ।

निपुणिका—किं करिष्यसि ?

गोविन्दः—तव साहाय्यम् ।

निपुणिका—कथमिव ।

गोविन्दः—पृच्छ मदनिकाम् ।

निपुणिका—किमयं प्रवक्ति ।

मदनिका—तव पाणिग्रहणमिच्छति ।

निपुणिका—तत्कथं भवती मन्यते ।

मदनिका—स्वीकुरुष्व । न पुनः समय इयात् ।

निपुणिका—बाढम् ।

मदनिका—एकमत्र तु प्रष्टव्यम् । रे गोविन्दभट्ट ।

गोविन्दः—ओ !

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनिका—त्वं मोदकान् वाञ्छसि ?

गोविन्दः—अथ किम् ।

मदनिका—भोजनशूरस्त्वम् ?

गोविन्दः—आम् ।

मदनिका—न भोज्ये तव विरक्तिः ।

गोविन्दः—न हि न हि ।

मदनिका—न वा भक्ष्ये ?

गोविन्दः—न हि ।

मदनिका—न वा चोष्ये ?

गोविन्दः—न हि ।

मदनिका—न वा लेह्ये ?

गोविन्दः—न हि ।

मदनिका—सर्वं दत्तं भक्षयिष्यसि ?

गोविन्दः—यदि नोदरं परिपूर्णं स्यात् ।

मदनिका—नैवं समीचीनम् । यत्प्रदीयते तदशितव्यम् ।

गोविन्दः—प्रयतिष्ये ।

मदनिका—निपुणिके वृणीष्वेमम् ।

गोपालः—(आर्तस्वरेण) गोविन्द, वयस्य, यज्ञियपशुवद् हन्यसे । मा बलित्वं यायाः ।

मदनिका—स्वामिन्, नात्र प्रयोजनमावयोरधुना । एहि, गच्छावः । [निष्क्रान्तौ ।]

गोविन्दः—निपुणिके, कदा मङ्गलमुहूर्तः संपत्स्यते ?

पण्डितराजः—(प्रविश्य) रे गोविन्द, कियन्तं कालं त्वां मार्गये । गन्तव्यमधुनोदयपुरमस्माभिः ।

गोविन्दः—गम्यताम् । सुखेन गम्यतां पण्डितराज ।

पण्डितराजः—त्वयाप्यागन्तव्यम् । कथमत्रैककोऽवसेः ?

गोविन्दः—नाहमधुनैककः । सद्वितीयोऽहम् ।

पण्डितराजः—कथम् ।

गोविन्दः—निपुणिकेयं मे जाया भविष्यति ।

पण्डितराजः—तदहमेवैककः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गोविन्दः—तदेव युक्तम् । संन्यासग्रहणे न सहायस्यापेक्षा । एकं तावत्तु करोतु भवान् । कांचित् मङ्गलघटिकां प्रदर्शयत्वद्यैव । ततो भवत्संन्यासग्रहणादूनतां गच्छद् गृहस्थत्वमहं संपूरयिष्यामि । एहि, निपुणिके, गन्तव्यमधुना । [निष्क्रान्तौ ।]

पण्डितराजः—अद्येयं कर्मभूमिरुज्जयिनी ननूज्झितव्या । नात्र निवसनं सहे । नापि देवी मामधुना मन्यते । न मे काव्यं कस्यैचिदपि रोचते । हा धिक् । चक्रनेमिक्रमोऽयं ननु ! शृणुत भोः पौराः,

(वहारः—त्रितालः)

कवयो नवाः समयोद्भवा
जयिनो मानधन्याः ॥
अभिनवकाव्यं सुजनैः श्राव्यं
स्मृता न पूर्वाः सूरिवदान्याः ॥ २३ ॥ [निष्क्रान्तः ।]

[ततः प्रविशति निजसदनप्राङ्गणे हृष्टचित्ताऽलका]

अलका—धन्योऽयं दिवसो नाथसंमानस्य । अधुना स महाकविर्जायेतैव । नैतावता संमानेनैव तेन सन्तुष्टेन स्थातव्यम् । देव,

(जिल्हा—धुमाळी)

कान्तहितेऽहं निरता । ते चरणे विनता ॥ धृ० ॥
महाकविपदे तं स्थापयिता । त्वद्दृते न च मतिदाता ॥ २४ ॥

[ततः प्रविशति विचारमग्नः कालिदासः । तं दृष्ट्वा]

किमापतितं नाथ । का वार्ता नृपसभायाः । कच्चित् कुशली भवान् ?

कालिदासः—सर्वः संमानः समाप्तिं गतः ।

अलका—समाप्तिं गतः ?

कालिदासः—अयि मुग्धे संपूरितः । प्रीतश्च पृथिवीपतिः । कुत इयं कातरता ? पश्य—

(सोहनी—झपतालः)

मानिता नृपतिना काव्यवनिता
गुरुपदे स्थापिता शब्दकान्ता ॥ धृ० ॥
नवरत्नहारे प्रथितोऽस्मि नेता
वरपण्डितानामेको विजेता ॥ २५ ॥

गृहाण च देव्या प्रदत्तामिमां ते रत्नमालाम् । [तस्याः कण्ठे करोति]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका—अपि प्रीतोऽसि ?

कालिदासः—किमेवं पृच्छ्यते ।

अलका—यतो न हृष्टमनाः प्रविष्टो भवान् ।

कालिदासः—पश्य प्रिये । संमानोऽयं न मम श्रेष्ठत्वात् कृत इति मन्ये ।

अलका—कथमिव ।

कालिदासः—न सेनापतेरभिमतो मत्संमान आसीत् । सैनिको जीवितप्रदानेन जनरक्षको नातः कविः श्रेष्ठतर इति तेन प्रतिपादितम् ।

अलका—ततस्ततः ?

कालिदासः—तदा महाराजेनोक्तम् । कवी राजयशश्चिरंजीवि करोत्यतः संमाननीयः ।

अलका—नृपाणां चिरंजीवनं कवेरधीनमिति सत्यमेव ।

कालिदासः—अत एव नृपाणां कविजने प्रीतिर्न निर्हेतुका स्यात् ।

अलका—निर्हेतुकः स्नेहः प्राकृतजनानामेव ।

कालिदासः—सत्यमकारणस्नेहिनः प्राकृतजनाः । न पुनस्ते सर्वे कवीनां दिव्यवाणीमवधारयितुं प्रभवेयुः ।

न प्राकृतान् प्रति महाकविदिव्यवाणी
तेषामलं ललितरञ्जनलोककाव्यम् ।
आम्रद्रुमाश्रितखगाः फलमाधुरीणा-
मासेवने किल रताः, न पिकस्वनानाम् ॥ २६ ॥

अलका—यथा कमलनिर्मितिमजानन्त एव भ्रमराः केवलं मधुसेवनपराः सरोजात् सरोजिनीं गत्वा रजःसंक्रमणेन कमलसातत्यं प्रवर्तयन्ते तद्वदेव प्राकृतजना दिव्यकाव्यमनवधार्यापि भजमानास्तच्चिरंजीवि कुर्वन्ति ।

कालिदासः—रुचिरमाह भवती सत्यं च । दिव्यत्वमजानन्तोऽपि दिव्यकाव्यं शाश्वतं विदधानाः प्राकृता न विस्मर्तव्याः । अत एव प्राकृतजनैः पठ्यमानं महाकाव्यं जगत्प्रदीपनं भवति । व्यासवाल्मीक्यादिभिः

अमरवाङ्मधुनिर्झरसागराः
पदनिधानततेः परिनिर्मिताः ।
जगति तापतृषाभिहताश्रया
जनहितं हि नितान्तमुनिव्रतम् ॥ २७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राकृतानामैहिकतापतृषाशमनक्षमं महाकाव्यं, शाश्वतं दिव्यसन्देशमपि महापुरुषेभ्यः प्रयच्छति ।

अलका—ईदृशं महाकाव्यमेव भवता रचयितव्यमधुना ।

कालिदासः—ततोऽपि मम मातृभूमिसेवैव प्रियतरा ।

अलका—तत्किं महाकविर्मातृभूमिसेवां न विदधाति काव्यनिर्मित्या ?

कालिदासः—विदधात्येव ।

व्यासो महाकविर्नाम रचयामास भारतम् ।
रामायणप्रणेता च वाल्मीकिमुनिसत्तमः ॥ २८ ॥

महत्कार्यं कृतं द्वाभ्यामेताभ्याम् । किं तु युद्धप्रचुरे विवादोत्कटे कालेऽस्मिन् न काव्यलेखने यापनीयः समयो मया । विधायकं राष्ट्रहितमेव मयानुसरणीयम् ।

अलका—नवरत्नपरिषत्प्रमुखत्वे नियुक्तेन नृपाज्ञया तत्प्रीत्यै विरचनीयमेव काव्यम् । कथं तत्परिहारशक्तो भवान् ।

कालिदासः—(तप्त इव) तर्हि नैव भवतु मे नवरत्नपरिषदः प्रमुखत्वम् ।

अलका—ननु रुष्टो भवान् दास्यामेतस्याम् ?

(तिलककामोदः,—दादरा)

रोषपदं मयि न नाथ । दास्यां तव दयित शान्त ॥ धृ० ॥
वदयति मां ते प्रेमा । भाविमहाकविमहिमा ।
राजतां स जगति कान्त ॥ २९ ॥

कालिदासः—(मार्दवेन) न हि प्रिये । कुतस्त्वयि रोषः ।

(मांडः,—त्रितालः)

प्रीतिरियं न च माया । मदीया । श्रेष्ठा त्वं किल जाया ॥ धृ० ॥
वचने सखि ते ममाप्यभिमते नावसरः कटुतायाः ॥
आस्ये दयिते स्याद् हास्यं ते लास्यैर्मे प्रतिभायाः ॥ ३० ॥

किंतु सांप्रतं युद्धपरिहारकर्तव्यं महत्तरं प्रिये । [सरस्वती प्रविशति ।] स्वागतं ते सरस्वति । अद्य शकुन्तलाभूमिका भवत्या परं समीचीना नाटिता ।

सरस्वती—नैतावता सन्तुष्टो महाराजः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अलका—कथमिदम् ।

सरस्वती—देव्या वसुधयाऽऽहूताऽहं नाटकप्रयोगानन्तरं प्रासादेऽभिनन्दनार्थे । महाराजोऽपि तत्रासीत् । कविकुलगुरुणा कालिदासेनापरं नाटकं प्रणेतव्यं यत्र विक्रमादित्यचरितं सम्यङ् निरूपितं भवेदिति महाराजेनोक्तम् ।

कालिदासः—ततस्ततः ?

सरस्वती—ततो देव्या वसुधया सनिर्बन्धं समादिष्टाऽहम् । सरस्वति, कथय मदादेशात् कालिदासं सद्योनियुक्तं नवरत्नप्रमुखं यन्महाराजेनादिष्टे नाटके राजनायक एकपत्नीव्रत एव तिष्ठतु ।

कालिदासः—के न्विमे जनाः कविमेनमाज्ञापयितुं यैर्न राजानो बहुपत्नीत्वान्निगृह्यन्ते । नाहमाज्ञाकरः कविः । सरस्वति, सपद्येव परिषत्प्रमुखपदस्य संन्यासपत्रं मया प्रेषणीयं महाराजाय । [गृहे निष्क्रान्तः ।]

सरस्वती—नैवं विधेयमार्यकालिदासेन । भवती किमप्युक्त्वा तं शान्तिपरं विधातुमर्हति ।

अलका—नैवं सरस्वति । पवनेन प्रज्वलनमेव पावकप्रकृतिः । कस्तामन्यथा कर्तुं प्रभवति । सरस्वति, नरजीवने क्वचिदेकः क्षण उदेति यदा परं तप्तो जनो निजस्वभावमप्यतिरुह्योज्ज्वलां प्रभां निर्मिमीते जीवितकार्यं च सफलीकरोति । मन्ये स एव मङ्गलमुहूर्तः समुत्थित आर्यजीवने । तन्नाधुना त्वया स प्रतिषेध्यः । इमामुत्कटामभ्यर्थनां मे न विफलीकर्तुमर्हति भवती ।

[संन्यासपत्रं गृहीत्वा कालिदासः प्रविशति ।] तत्किमेकपत्नीव्रतो नायको राजा न भवतोऽभिमतः ?

कालिदासः—मैवं प्रिये । यद् यदिह सत्यं शिवं सुन्दरं तस्य दासोऽयं जनः । न पुनर्दम्भं सहे । प्रायो बहुकलत्रा राजानः । अभिनवसुन्दरीं पुनरभिलषन्ति । किं तेषां प्रासादस्थैरेकपत्नीवीरवर्णनेऽहमुपदेष्टव्यः ।

रजःकणैः किं चरणावलिप्तैः
साधर्म्यमाप्यं किरणै रवेर्नु ।
स्पृशन्ति सूर्यस्य करा रजांसि
समत्वभावात्, न समानधर्मात् ॥ ३१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरस्वति, त्वयाऽऽनीतस्य सन्देशस्य प्रतिवचनमिदं संन्यासपत्रं त्वयैव महाराजहस्ते समर्पणीयम् । [सरस्वत्यै पत्रं ददाति ।]

सरस्वती—यदार्य आज्ञापयति । [निष्क्रान्ता ।]

अलका—अनेन त्यागेन महाकविपथे पदमुपन्यस्तं भवता । धन्योऽयं दिवसः समुदितः—

अमात्यराजः—(प्रविश्य) आर्य कालिदास, महाराजेन प्रेषितोऽहं त्यागपत्रं भवतोऽधिगन्तुम् ।

अलका—किमधिकृत्य ब्रवीति भवान् ?

अमात्यराजः—प्रायो न जानाति भवती । कविराजसंमानानन्तरं प्रासादं गत्वा सेनापतिना निजकार्यान्मुक्तिर्याचिता महाराजचरणे ।

अलका—कथमेतत् ।

अमात्यराजः—तेनोक्तं 'यदि कालिदासः शान्तिदूतोऽभिप्रेतोऽभिमतश्च महाराजस्य तर्हि क्रियाहीनं सेनापतिपदं विभूषयितुं न समर्थो भवेयमिति ।

अलका—ततस्ततः ।

अमात्यराजः—यदा भृशमनुनीतोऽपि न निश्चयादेष परावृत्तस्तदा महाराजेन परराष्ट्रकार्यालयादत्रभवतस्त्यागपत्रमाज्ञापितम् ।

कालिदासः—मे त्यागपत्रम् ? परराष्ट्रकार्यालयात् ?

अमात्यराजः—देव्या वसुधयाऽप्युक्तं नवरत्नपरिषत्प्रमुखस्य न परराष्ट्रकार्यालये नियुक्तिरावश्यकीति । त्यागपत्रं लेखयित्वाऽत्रानीतं चेदम् । महाराजेनोक्तं कालिदासोऽस्मदभीप्सितं ज्ञास्यतीति । [तस्मै त्यागपत्रं ददाति ।]

कालिदासः—एवमुक्तं महाराजेन । साधु ।

[त्यागपत्रं गृहीत्वा स्वनामाङ्कितं कृत्वामात्यराजाय प्रत्यर्पयति ।]

अमात्यराजः—साधयाम्यधुना । स्वस्ति भवते । स्वस्ति भवत्यै । [निष्क्रान्तः ।]

अलका—नाथ, यन्मानस्थानं भवता समर्जितं तस्य त्यागो महानयम् । ननु रोचते भवत एतत् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः—(प्रीतमनाः) रोचते ? प्रिये नेतःपरमाज्ञाकरः सेवकोऽहम् । बन्धमुक्तो विहंगम इवानन्तकाव्यानन्दाम्बरे विहर्तुं क्षमोऽहमधुना । विशुद्धानन्दमयी चित्-स्फुलिङ्गस्वरूपिणी प्रतिभा ममोल्लसतु त्रिभुवनानन्दाय । प्रिये महाकाव्यमेव विरचयामि । यत्रैकवीरेण केवलं दुर्जनविनाशाय शस्त्रं गृहीतं निजचरित्रेण तु परमैकान्तप्रीतिसन्देशो जगति वितीर्णस्तस्यैव श्रीरामचन्द्रस्य चरितं घोषयामि । (किंचिद्विरम्य) नैतत्पुनर्नाटकं भवितुमर्हति ।

अलका—को जानीयात् । उत्पत्स्यते कोऽपि कविप्रकर्षो येन रामचन्द्रचरिते रतेन निर्मास्यते कापि नाट्यकृतिर्भवमग्नभूतिः । एकपत्नीव्रतो राजा रामचन्द्रो महदुत्तुङ्गप्रेमभाजनम् ।

कालिदासः—न केवलं श्रीरामचन्द्रस्तस्य सूर्यप्रभवः सकलो वंश एव मत्काव्यविषयो भवेत् । जानन्तु सर्वे राजानोऽस्मिन् भारतवर्षे कथं नृपैर्वर्तितव्यम् । तेषामाजन्मशुद्धानां रघूणामन्वयं वक्ष्ये । तन्महाकाव्यं प्रिये, एवंविधं भवेद्यथा मे शान्तिसन्देशस्त्रिभुवने ख्यातिमियात् ।

अलका—एवं सति राजाऽपि सत्यमनसा महान्तं संमानं भवते वितरेदेव नु ?

कालिदासः—का कथा संमानस्य नृपविहितस्य । स एव संमानो यः शब्दार्थयुगलस्य सामर्थ्यप्रतीतेर्विभिन्नैर्विद्वद्विद्वद्भिरावालवृद्धैः काव्यस्य पुनः पुनः पठनेन यावच्चन्द्रदिवाकरौ क्रियते । एकशरीरेऽर्धनारीनटराजेन संयुतं द्विधा रूपं यथाऽवभासते तथैव मे शब्दार्थयुगलमविरतं वितन्येत । भो महाकाल,

(मालकंसः—झपतालः)

कैलासराजः शिव इन्दुमौलिः
फणीन्द्रभोगावृतकण्ठशोभः ।
कारुण्यसिन्धुर्भवदुःखहारी
त्वं मे सहायः प्रलयेश शम्भो ॥ ३२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विराजते सा गिरिजा भवानी
स्मरान्तकस्त्वं विजितो यया हि ।
पीत्वापि हालाहलमात्मतुष्ट-
स्त्वं तारको मे जगदीश शम्भो ॥ ३३ ॥

त्रिलोकदाहानलनेत्रशाली
त्रिलोकपालः करुणारसार्द्रः ।
गङ्गां वहन् पावनवारिराशिं
त्वं तारयेमां हृदयेश शंभो ॥ ३४ ॥

[ध्यानस्थ इव स्तब्धो भवति ।]

[ततः प्रविशति राजाऽमात्यराजः सेनापतिर्वसुधा सरस्वती च ।]

सेनापतिः—आर्ये, कालिदासेन—

राजा—नवरत्नपरिषत्प्रमुखपदस्य—

वसुधा—संन्यासः किं—

अलका—शान्तम् । अस्मिन् मङ्गलघटिकायां न मर्त्यैरस्माभिरमृतजननं निरोध्यम् । सर्वबन्धमुक्तो महाकविर्दिव्यवाणीमुदाहरति तत्र—

कालिदासः—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ ३५ ॥

[रघुवंशश्लोका अनुस्रवन्ति । व्योम्नः पुष्पवृष्टिः ।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(भरतवाक्यम् ।)

(भैरवी–दादरा)

परमेशवन्दनां करवाम पावनाम् ॥ धृ० ॥

भारतभूरुच्छ्रिता । सकलमातृदेवता ।
प्रिया तदीयदासता । विलीयतां तदार्तता ।

प्रभोः प्रार्थनाम् ॥

युद्धलालसां पुनः । जहातु सर्वथा जनः ।
शान्तिदूतसज्जनः । संमतोऽस्तु मानिनः ।

प्रभोः प्रार्थनाम् ॥

कालिदासचरितमिदम् । भवतु रसिकतोषदम् ।
नमाम शारदापदम् । देववाञ्छितप्रदम् ।
श्रीरामकामनाम् । करवाम पावनाम् ॥ ३६ ॥

[सर्वे निष्क्रान्ताः ।]

इति पञ्चमोऽङ्कः । • • • • •

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

सूक्ति-संग्रहः १०२

पद्यसूचिः १०५

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासचरितान्तर्गत-
सूक्तिसंग्रहः।

१ सुप्तो हि बोधनक्षमः। प्रबुद्धं तु को नाम बोधयिष्यति। ३
२ न हि चतुःशालस्थिता संमार्जनी देवगृहे स्थापनीया। ३
३ नवतामाश्रितं रमणीयत्वम्। ४
४ न मारुतः शैलवरं धुनीते
विधूतवृक्षो वसुधाभृतं तम्। ५
५ राज्यकार्यं यथाकालं न कुर्याद् यो महीपतिः।
न शास्ति चिरकालं स वसुधां संभृतश्रियम्॥ ८
६ कण्टकास्तृतमेव राजसिंहासनम्। ९
७ महापदस्थितस्यापि जनसेवा न वर्जिता। ९
८ न स्पृशेद्रजनीध्वान्तं नभो धाम प्रभावताम्। ९
९ तद् दुःखं हि रसोद्गमेऽपि रसिको राजन् न संपद्यते। ११
१० अप्ररूढमूलः शत्रुः कुद्रुमवदुत्खातव्यः। १३
११ न युद्धकारिता प्रथमत एव समर्थनीया। १३
१२ न युद्धं लोककल्याणकरम्। १४
१३ शुभा मयि तवाशु भाग्यवति सन्तु सर्वाशिषः। १५
१४ सेवाऽपि भाग्यनिहिता ननु साऽत्र धन्या। १६
१५ परचक्रभये कुत उत्सवः। १६
१६ न कदाऽङ्गना सहते सपत्नीम्। १६

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

१७ विना शौर्यं न संपद् । २१
१८ नश्यतु दुःखं भवतु च सुखम् । २२
१९ कथं जीवेद्वा जलं विना मीना । २४
२० देशकार्ये व्यक्तिसौख्यमाहवनीयम् । २५
२१ उदिते गगने मित्रे ध्वान्तभीतिः कुतो भुवि । ३०
२२ यत्कर्तव्यं तद्विमृश्यैव कार्यं
नाशो नित्यो वैपरीत्येन वृत्तौ ।
नेदं श्लाघ्यं यद्धि भूपाविवेकै-
र्दुःखाधेयः सर्वलोको ह्यनागाः ॥ ३१
२३ प्रेमयाचनैर्जिता न ललना
शूरपथे सा माला लुलिता ॥ ३८
२४ दुःखार्तानां विपदपनये सज्जनानां प्रयत्नः । ३९
२५ न राष्ट्रं राष्ट्रमेव स्यात् कलाशास्त्रनिधिं विना । ४८
२६ प्रजानुरागे नृपशासनं स्यात्
प्रजाविरागे तु कुतो नरेन्द्रः ॥ ४९
२७ संसारे पत्नीयमनुस्वरन्ती वीणैव । ५१
२८ सा मधुरा नाम वार्ता पुनः पुनर्या श्रोतुमीहिता । ५६
२९ मनसा चिन्तितं न वैरिणापि चिन्त्यते । ५६
३० विधिरपि न वा प्रायो विद्यादिदं ललनामनः । ६०
३१ विरहिण्या रात्रिर्निर्घृणैव । ६१
३२ रमणीप्रिया पतिसेवा । ६३
३३ पङ्कोऽपि पद्मप्रभवः । ६६
३४ गौरवं पीडयान्वितम् ।
पीडा तु नश्यति गौरवं च चिरं तिष्ठति । ६६
३५ सवितुर्नैव किरणस्तमोरूपेण संभवेत् ।
अमरत्वप्रदाय्येतदमृतं न विषं भवेत् ॥ ७४
३६ एकं सद्ब्रह्म सहते नान्यत्तत्त्वं जगद्मृतम् । ७४
३७ यथा शब्दः प्रमाणं स्यात् सद्विधिप्रतिषेधयोः । ७४
३८ दिनेशो नोदयं यायाज्जन्मान्धस्य कदाचन । ७५
३९ क्रियापदं सदा वाक्ये कर्तुरन्यं न वान्वियात् । ७५
४० विलम्बं नैव सहते कुव्याधिमथनेऽगदे ।
न क्षिपेच्च भिषक्कालं दुष्टस्याङ्गस्य कृन्तने ॥ ७५

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

४१ न रुचिरं किंचिच्चिराय विचरति । ७९

४२ न युक्तं पुष्पाणां तदुपहसितं शस्त्रतुलितम् । ८२

४३ भवति मदनबाधा सर्वथा निष्क्रियाणाम् । ८३

४४ नैकेन चन्दनेनात्र सर्वे वृक्षाः सुवासिताः ।
नैकया गङ्गया चापि पावनाः सर्वनिर्झराः ॥ ८४

४५ मलयजसदृशत्वं याति किं कृष्णसर्पः । ८६

४६ आगामिन्या मुनिवरमनोः संततेः संस्कृतेस्ते
निर्मातारो बहुविधकलाकारवृन्दा हि वन्द्याः । ८६

४७ ग्राह्यं भोज्यरुचौ मतं रसविदो भोक्तुर्न सूदस्य यत् । ८७

४८ यान्त्येते मधुलोलुपा हि भ्रमराः पद्मं; न तत् षट्पदान् । ८७

४९ प्रजापीडा प्रायः पृतनाभिः प्रतिहन्यते । ८८

५० क्षणिकः पराक्रमः । तत्काव्यगानं तु चिरंतनम् । ८८

५१ कवयो नवाः समयोद्भवा जयिनो मानधन्याः । ९३

५२ जनहितं हि नितान्तमुनिव्रतम् । ९४

५३ पवनेन प्रज्वलनमेव पावकप्रकृतिः । ९६

५४ रजःकणैः किं चरणावलिप्तैः
साधर्म्यमाप्यं किरणै रवेर्नु ।
स्पृशन्ति सूर्यस्य करा रजांसि
समत्वभावात्, न समानधर्मात् ॥ ९६

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासचरितान्तर्गत-

पद्यसूचिः ।

(अन्यग्रन्थोद्धृतपद्यं नात्रान्तर्भूतम् ।)

पद्यारम्भः ।	पृष्ठ	पद्यारम्भः ।	पृष्ठ
अतनोर्मदनादयं ज्वरः	११	ऋणिनीयं विदिशायाः	८०
अधीत्य शास्त्रसंभारं	८६	एकं सद्ब्रह्म सहते	७४
अधीत्य शास्त्राणि भवन्तु शास्त्रिणः	४८	एषा नलिनदलकोमला	६९
अनन्तवागीशमनादिभाषा	४१	कथं दोषः स्पृशेदत्र	९
अनभिज्ञः प्रमाणानां	७५	कवयो नवाः समयोद्भवाः	९३
अनेन दासेन किलापराद्धं	७	कविः काव्योद्देशे चिरपरिचिते	८२
अपसारिता कविताङ्किता	१६	कविकुलगुरुचरितं विरचितं	२
अमरवाङ्मधुनिर्झरसागराः	९४	कान्तहितेऽहं निरता	९३
अरिजनहनने यत्	८६	कामिनी हृदयमोहिनी	१८
अलकाम्बुदराजिरिता	५९	कालिदासचरितं न च जाने	७१
अवतु सर्वदा शङ्करमहिमा	१	काव्यज्ञ रसिकैर्गुणाः	८७
अस्मान् साधु विचिन्त्य	१५	काव्यानन्दे विकसति मनः	८६
अहं नहीशो विनतोऽस्मि दासः	४२	काव्याम्भोधे रसवति जले	७
आमन्त्रये त्वां विदर्भेश राजन्	३१	किं कुरुतां सा हिमशशिना	६१
आहृता चारुता नयनयोः	४५	कुलशैलशृङ्गात्	१९
ईशः कैलासनाथः	१	कैलासराजः शिव इन्दुमौलिः	९८
उज्जयिन्यां राजधान्यां	२३	क्षणमपि मे त्वं विगता	६२

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

क्षिप्रा नटी जीवननृत्यसक्ता १०
क्षिप्रा नदी जीवनमुज्जयिन्यां १०
गुणग्राहिण्येषा परिषद् ८४
चकोरवाञ्छिता ६५
चक्रवाकी भर्त्रा ६५
जानीम आत्मनः श्रेयः ३१
जीवेद्धि राष्ट्रं भुवने ४८
ज्योत्स्नां या मन्दहास्यैः १३
तव निपुणिके ६८
ते हि चरणे मे शरणम् २२
त्रिलोकदाहानलनेत्रशाली ९९
दत्ताभयोऽयं तव देवि दासः ५
दर्शनं न भवतश्चरणाब्धेः ७७
दिवंगतानां भूपानां ८४
दुरितवृता विभवयुता २५
दुष्यन्त एष ननु ८३
देव तव चरणरजसि विलीना २६
धन्याः प्रजाः समधिगत्य १६
न कालिदासश्चरणस्थदासः ४१
न चैषा कान्ता तं वियोगं ६१
नताननं तून्नमयेत्करोऽयं ४१
नतो न मूर्धैष कुतोऽपि २९
नदति विबुधवासे दुन्दुभिः २७
न प्राकृतान् प्रति महाकवि० ९४
न मन्तव्यं काव्ये तव विरतिः ८८
न मन्तव्यं काव्यं मृतमिह २९
नयने मम नूनमधीरे ५६
नराधिप वृता श्रुतिस्मृतिमता ८५
नवरत्नसभापतिर्नृपः ८४
नात्याहितं तत् ४१
नात्र प्रजाः समरदैवत० ४८
नैकेन चन्दनेनात्र ८४
पङ्कजानना चञ्चलचरणा ३७
परमेशवन्दनाम् १००
परिविलोकयता विधुम् १२
परिषदि कविरेवं ८९
पुराङ्गदवृतो दुरासदः १५
प्रजा याः पुत्रवत् प्रेम्णा १६,३०
प्रणयिहृदया यूयं बाला ६०
प्रत्युत्पन्नमतिः प्रजाहितकृतिः ८४
प्रफुल्लपुष्पप्रचयप्रजामुखैः ६
प्रायो न वेत्ति दलभारपतिः ८३
प्रीतिरियं नच माया ९५
प्रेमपाशैर्निबद्धाऽहं ६२
भरतभूषणा २
भवतो वचनादेव ७५
भवत्सेवाजलाकाङ्क्षी ७६
भवदाशिषा मम जीवनदोषा ७८
भीष्मग्रीष्मकराहता ४९
भूगतो ननु पूषा २४
मदनवदनदेवं ८
मदनिकाद्युतः ६८
मन्दं मन्दं वहति पवनः ३९
मम विमला ननु बाला ६४
महानरवीरता ३८
महापदस्थितस्यापि ९
महेशपादप्रणताङ्गनायाः ७
मातृभूमिविजयः प्रियो हि मे १५
मानिता नृपतिना ९३
मेघमवेक्षते ६५
यत्कर्तव्यं तद्विमृश्यैव कार्यं ३१
यथा शब्दः प्रमाणं स्यात् ७४
यदि न च परिहार्यः १५,३०
यस्य प्रजा निहतशत्रुगणाः २७

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यस्य बालकस्य ६८
यस्या नाथेन पृथ्वी १२
यस्या बालिकायाः ६८
रघुनाथकन्या ६८
रजःकणैः किं चरणावलिप्तैः ९६
रमणीप्रिया पतिसेवा ६३
राज्यकार्यं यथाकालं ८
रामालोके समुद्भूते ६३
रोषपदं मयि न नाथ ९५
ललनास्ति महाज्वराहता ११
लाभाशया न रचितं ८६
वनिता विहिता पतिशरणा ५१
वन्देऽहं वसुधादेवीं ७७
वयं न मरणाद् भीताः ३०
वरं रिपुणा वृतं २२
वह्निज्वाला बलसमुदिता ८८
वितरति मरणं भोः ८६
विदिशाशासने शश्वत् ३१
वियन्मध्यारूढो ७५
विराजते सा गिरिजा ९९
विलम्बं नैव सहते ७५
वैभवसंयुतः १९
व्यासो महाकविर्नाम ९५
शरदि यामिनी ६१
शास्ता भवेद्यः ४२
श्राव्यं श्रुतं वेधि हृदां ४२
श्रीरामचन्द्रचरितस्य ८३
श्रुतिपदनिपुणानां ८३
सन्तप्तानां त्वमसि शरणं ३९
समरनिपुणता यद् ४८
सरस्वतीजप्रतिभाप्रभावात् ४१
सरस्वतीनूपुरझङ्कृतिर्मे ४०
सर्वतीर्थोदकैर्धौते ७६
सवितुर्नैव किरणः ७४
सा मधुरा नाम वार्ता ५६
सुखिनी न च ललना २५
सेनाकार्यं नास्ति तत् ४८
सेनापतिः कविवरश्च ८८
सौख्यदिनमेति मे ४६
सौन्दर्यवाह्यां वयसा ४२
संगतौ ते निर्वृता २४
संगीतिर्मधुरापि या ११
संमानो यदि मे कवेः ८७
स्मरति नो कथं ३
स्मृतिनिमीलितलोचन० १२
स्वदेशरक्षणे तद्वत् ३०
हितं जनानां परराष्ट्रिकाणां ४९

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

SOME OPINIONS ON

संगीतसौभद्रम् ।

Shri **P. K. Atre** B. A., B. T., T. D. (London) popular Marathi playwright & humorist writes :-

"I cannot describe in words my joy & satisfaction at the consummate execution of the task. Your dialogues & songs are par excellence. One derives the same pleasure as from the original. Your mastery over the Sanskrit language is astounding. It is a pity that Maharastra did not know genius of your type till this moment. May I request you to do similar rendering in respect of "Samshaya Kallol" & "Swayamwar ?"

Dr. **B. R. Saksena** M. A. Ph.D. saugor University writes :

"I find the translation readable and excellent & I congratulate you on this attractive production. We hope to have more such things from you."

सुप्रसिद्ध नाटककार व विनोदी लेखक श्री. **पु. ल. देशपांडे** एम्. ए. एल्. एल्. बी. लिहितात :

"संगीत सौभद्रम् वाचून काढलें. यापूर्वी कुठलेंही संस्कृत पुस्तक इतक्या सहजतेने वाचलेलें स्मरत नाही. अण्णासाहेब किर्लोस्करांची मराठींतील सहजता आपण संस्कृत भाषांतरात देखील आणली याचें मला सर्वांत अधिक नवल वाटलें. अण्णांच्यासारखें सहज मराठी लिहिणेदेखील अवघड आहे. अशा वेळी संस्कृतांत हा साधेपणा टिकविणे कठीण होतें. असामान्य भाषाप्रभुत्वाखेरीज सोपें लिहिणें जमत नाही. गीर्वाण भाषेंत पांडित्य करणें सोपें आहे, सोपें लिहिणें हें मात्र ती भाषा संपूर्णपणें आत्मसात केल्याशिवाय अशक्य. गाण्यांच्या भाषांतराने तर मी थक्क झालों. मी तीं गाणीं स्वतः मोठ्याने गाऊन पाहिलीं. कुठेही यतिभंग नाही–ओढाताण नाही. मुळांतलें लालित्य–सौष्ठव जसेंच्या तसें आहे. गाण्याच्या भाषांतराचें कार्य म्हणजे आपल्या हातून घडलेला एक चमत्कारच आहे"

मराठींतील प्रतिभासंपन्न कांदबरीकार व चतुरस्र लेखक श्री. **वि. स. खांडेकर** लिहितात :

"आपलें सौभद्र नाटकाचें संस्कृत भाषान्तर माझ्यासारख्या संस्कृतप्रेमी वाचकाला इतकें आनन्द देणारें आहे, कीं त्याचा यथाशक्ति परामर्श घेतला नाही तर कर्तव्यांत चुकल्यासारखें होईल."

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

By the Same Author

विष्णुवर्धापनम्	(१९४७)
गुरुवर्धापनम्	(१९५३)
जयमङ्गला	(१९५९)
जीवनसागरः	(१९६०)
संगीतसौभद्रम्	(१९६१)

संगीतसौभद्रम्

"अनेन संस्कृतानुवादेन अनुवादकाभीष्टे द्वे कार्ये साधयितुं शक्येते—प्रथमं महाराष्ट्र-प्रदेशतो बहिर्वर्तमानानां नानाप्रान्तीयानां मराठीसौभद्रस्य सुमुद्रां लक्ष्मीमास्वादयितु-मवकाशः, द्वितीयं संस्कृतरङ्गं तत्र तत्र प्रवर्धयितुमुत्सुकानां सुप्रसिद्धप्रयोगवस्तु-लाभश्च।"

संस्कृतप्रतिभा—अक्टोबर १९६०.

"... सबंध पुस्तक वाचल्यावर मनावर ठसा उमटतो तो हा, कीं अनुवादकर्त्याने अनुवाद करताना मुळाशी संपूर्ण इमान राखलें आहे. दुसरी महत्त्वाची गोष्ट म्हणजे अत्यंत सोप्या व सुटसुटीत संस्कृतांत हा अनुवाद सादर केला आहे. त्यांत कृत्रिम अलंकार साधण्याचा प्रयत्न नाही.....

केसरी—२ जुलै १९६१.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



Shri S. B. Velankar is sufficiently introduced to the readers of Sanskrit drama & poetry as a versatile Sanskrit writer by his संगीतसौभद्रम् a masterly rendering into Sanskrit of the original Marathi play by the late Annasaheb Kirloskar. No small contribution has, however, been made to his reputation by his जयमङ्गला (1959) Sanskrit rendering of a popular poem by महाराष्ट्रकवि यशवन्त and जीवनसागरः (1960) a lyrical homage to Dr. P. V. Kane.

Shri Velankar has now attained new heights of his genius in his latest original play कालिदासचरितम् which is in five acts. Scholarship and originality are evenly combined in this play — a phenomenon which is rarely witnessed. His Prose & Verse vie with each other in their ease & elegance in this play.

Born in 1915, Shri Velankar graduated from the Wil College, Bombay, securing first-class & all prizes & scholarship the University Examinations. He stood first in M. A. with Z Vedanta to his credit.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha